श्री सिद्धि–भुवन–मनोहर जैन ग्रन्थमाला

चिरन्तनजैनमुनिप्रवरप्रणीतः

# सर्वसिद्धान्तप्रवेशकः


• सम्पादक •

पूज्यपाद–गुरुदेव–मुनिराजश्रीभुवनविजयान्तेवासी

मुनि जम्बूविजयः



• प्रकाशक •

श्री सिद्धि–भुवन–मनोहर जैन ट्रस्ट, अहमदाबाद

श्री जैन आत्मानन्द सभा, भावनगर



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री सिद्धि-भुवन-मनोहर जैन ग्रन्थमाला

चिरन्तनजैनमुनिप्रवरप्रणीतः

# सर्वसिद्धान्तप्रवेशकः

• सम्पादकः •

पूज्यपादगुरुदेवमुनिराजश्रीभुवनविजयान्तेवासी

मुनिजम्बूविजयः

**नम्र सूचन**

**इस ग्रन्थ के अभ्यास का कार्य
पूर्ण होते ही नियत समयावधि में
शीघ्र वापस करने की कृपा करें.
जिससे अन्य वाचकगण इसका
उपयोग कर सकें.**

• प्रकाशक •

*श्री सिद्धि-भुवन-मनोहर जैन ट्रस्ट, अहमदाबाद*

तथा

*श्री जैन आत्मानन्दसभा, भावनगर*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकाशक :
श्री सिद्धि-भुवन-मनोहर जैन ट्रस्ट
A-३ चंदनबाला एपार्टमेन्ट
नवा विकास गृह रोड
अशोकनगर, पालडी, अहमदाबाद-३८०००७

●

तथा
श्री जैन आत्मानन्दसभा
खारगेट, भावनगर (सौराष्ट्र)

●

द्वितीया आवृत्ति : विक्रम सं. २०६१, ईस्वीसन् २००४

●

प्रतियाँ : ५००

●

मूल्य : पठन-पाठन
स्व. भाईचंदभाई छोटालाल संघवी (मांडलवाला)
की स्मृति में

●

अक्षरांकन : विरति ग्राफिक्स, अहमदाबाद
फोन : ०७९-२२६८१८१४

मुद्रक
*मुद्रेश पुरोहित*
सूर्या ऑफसेट
आंबली गाँव, सेटेलाइट-बोपल रोड, अहमदाबाद-३८००५८
फोन : (०२७१७) २३०११२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हन्तो भगवन्त इन्द्रमहिताः

सिद्धाश्च सिद्धिस्थिताः ।

आचार्या जिनशासनोन्नतिकराः

पूज्या उपाध्यायकाः ॥

श्रीसिद्धान्तसुपाठका मुनिवरा

रत्नत्रयाराधकाः ।

पञ्चैते परमेष्ठिनः प्रतिदिनं

कुर्वन्तु वो मङ्गलम् ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# કુસુમાંજલિ

अवापं सर्वसिद्धान्तप्रवेशं यत्कृपाबलात् ।
तेभ्यः श्रीमेघसूरिभ्योऽर्प्यतेऽयं कुसुमाञ्जलिः ॥

જેઓશ્રીના આશીર્વાદના પ્રભાવે મારો દર્શનશાસ્ત્રોમાં પ્રવેશ
થયો, જેઓશ્રી મારા પૂજ્ય ગુરુદેવના પણ પૂજ્ય ગુરુદેવ
છે તે અગાધ કરુણાના સાગર અને ગાંભીર્યમૂર્તિ
પરમપૂજ્ય પરમોપકારી પરમગુરુદેવ
આચાર્યદેવ શ્રી ૧૦૦૮ વિજય
મેઘસૂરીશ્વરજી મહારાજાના
કરકમલમાં આ લઘુગ્રંથરૂપી
કુસુમાંજલિ અર્પણ
કરીને હું ધન્યતા
અનુભવું છું.

— શિશુ જંબૂવિજય

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूज्यपाद संघस्थविर आचार्यदेव श्री १००८ विजयसिद्धिसूरीश्वरजी (बापजी)
महाराजना पट्टालंकार

# पूज्यपाद आचार्यदेवश्री विजयमेघसूरीश्वरजी महाराज



जन्म : वि. सं. १९३२, मागशर सुदि ८, रांदेर
दीक्षा : वि. सं. १९५८ कार्तिक वदि ९, मींयागाम–करजण
पंन्यासपद : वि. सं. १९६९, कार्तिक वदि ४, छाणी
आचार्यपद : वि. सं. १९८१, मागशर सुदि ५, अमदावाद
स्वर्गवास : वि. सं. १९९९, आसो सुदि १, अमदावाद

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूज्यपाद प्रातःस्मरणीय संघस्थविर श्री १००८ आचार्यदेवश्री
विजयसिद्धिसूरीश्वरजी (बापजी) महाराजना पट्टालंकार
पूज्यपाद आचार्यदेवश्री विजयमेघसूरीश्वरजी महाराजना शिष्यरत्न

# पूज्यपाद गुरुदेव मुनिराजश्री भुवनविजयजी महाराज



जन्म : वि. सं. १९५१ श्रावण वदि ५, शनिवार, ता. १०-८-१८९५, मांडल
दीक्षा : वि. सं. १९८८ जेठ वदि ६, शुक्रवार, ता. २४-६-१९३२, अमदावाद
स्वर्गवास : वि. सं. २०१५ महा सुदि ८, ता. १६-२-१९५९, शंखेश्वरजी तीर्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूज्यपाद साध्वीजी श्री लाभश्रीजी महाराज (सरकारी उपाश्रयवाला)ना शिष्या

**पूज्यपाद साध्वीजी श्री मनोहरश्रीजी महाराज**



जन्म : वि. सं. १९५१ मागशर वदि २, शुक्रवार, ता.१४-१२-१८९४ झींझुवाडा
दीक्षा : वि. सं. १९९५ महा सुदि १२, बुधवार, ता. १-२-१९३९ अमदावाद
स्वर्गवास : वि. सं. २०५१ पोष सुदि १०, बुधवार, ता. ११-१-१९९५ रात्रे ८-५४
वीशानीमाभवन जैन उपाश्रय, सिद्धक्षेत्र पालिताणा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# स्व. भायचंदभाई छोटालाल संघवी (मांडलवाला)



जन्म : ८–१–१९३२
मांडल

स्वर्गवास : २७–१०–२००४
अमदावाद

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ णमोत्थु णं समणस्स भगवओ महावीरस्स ॥

॥ श्रीसिद्धचक्राय नमः ॥

# विज्ञपनम्

**सज्जना विद्वन्महोदयाः !**

अद्य भवतां पुरः सर्वसिद्धान्तस्वरूपावेदकतया यथार्थाभिधानं **सर्वसिद्धान्तप्रवेशका**भिधानमिदं ग्रन्थरत्नमुपस्थाप्यते । **जेसलमेरदुर्गे** जैनग्रन्थागारे विद्यमानं तालपत्रेषु लिखितं प्राचीनमादर्शद्वयमवलम्ब्य सम्पादितोऽयं ग्रन्थः । अस्य कर्तुर्नाम द्वयोरप्यादर्शयोरन्तः कुत्रचिदप्यदर्शनाद् न विज्ञायतेऽस्माभिः । तथापि प्रारम्भिकपद्यानुसारेण जैन एवास्य ग्रन्थस्य विरचयितेति स्फुटमेव प्रतीयते । एक आदर्शो वैक्रमे १२०१ वर्षे लिखितः, अपरस्तु ततोऽपि पञ्चाशद्देशीयैर्वर्षैः प्राचीनः । ग्रन्थस्य बाह्याभ्यन्तराङ्गपर्यालोचनया अस्य कर्तारो जैनमुनयः षड्दर्शनसमुच्चयविरचयितृभ्यो याकिनीमहत्तराधर्मपुत्राचार्यप्रवरश्री**हरिभद्र**सूरिभ्योऽनन्तरं वैक्रमीयद्वादशशताब्दीतश्च पूर्वं कदाचिदपीदं भूमण्डलमलञ्चक्रुरिति विभाव्यते । न्याय-वैशेषिक-साङ्ख्य-बौद्ध-जैन-मीमांसा-लोकायतिकदर्शनानां तस्मिन् काले प्रधानतया प्रसिद्धानां सिद्धान्ता अत्र तत्तद्दर्शनसत्कप्राचीनग्रन्थानुसारेण वर्णिताः । यद्यपीदं वर्णनं किञ्चित् संक्षिप्तं तथापि सुयोग्याध्यापकच्छात्रयोर्योगे महते ज्ञानलाभाय प्रभविष्यत्ययं ग्रन्थ इति निश्चितं नश्चेतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जैनसाहित्यविकासमण्डलस्य मुख्यसंचालकानां स्वबुद्धिविभव-विपुलव्ययेन नानाविधजैनसाहित्यसंशोधनप्रकाशनादिष्वमितमुत्साहमा-बिभ्रतां मन्त्रादिविविधविद्यारसिकानां कलाप्रियाणां श्रुतज्ञानोपासकानां देवगुरुधर्मानुरागिणां श्रेष्ठिश्री**कालिदासात्मजानां** श्री**अमृतलालभाई** दोशी बी.ए. महोदयानामुत्साहेनैवायं ग्रन्थः जैन साहित्यविकासमण्डलेन प्राक् वि. सं. २०२० वर्षे प्रकाशितः । अतस्तेभ्योऽत्र धन्यवादान् वितरामि । सम्प्रति तु तस्य द्वितीयं संस्करणं प्रकाश्यते ।

क्वचित् तुलनात्मकैः क्वचिच्च स्पष्टताविधायिभिष्टिप्पणैः समलङ्कृत्य पाठान्तरादिभिश्च संस्कृत्य यथामति च संशोध्य सम्पादितोऽयं ग्रन्थः परमात्मनो गुरुदेवस्य च प्रसादात् । अस्य ग्रन्थ-स्याध्ययनाध्यापनाभ्यामस्माकं परिश्रमं सज्जनाः फलेग्रहिं कुर्युः ।

**—इति विज्ञपयति**

पूज्यपादाचार्यमहाराजश्रीमद्विजय**सिद्धिसूरीश्वर**पट्टालंकार-
पूज्यपादाचार्यमहाराजश्रीमद्विजय**मेघसूरीश्वर**शिष्य-
पूज्यपादगुरुदेवमुनिराजश्री**भुवनविजया**न्तेवासी
मुनि **जम्बूविजयः**

कार्तिकशुक्लपूर्णिमा, विक्रमसं० २०६१, ता. २६-११-४ शुक्रवासरः
**कुम्भण** (ता. महुवा, जिल्ला-भावनगर) Pin-364290, गुजरातराज्यम्

• • •

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्री शङ्खेश्वरपार्श्वनाथाय नमः ॥

# किञ्चिद् वक्तव्यम्

## [ प्रथमसंस्करणगतम् ]

**आचार्यमहाराजश्रीमद्विजयसिद्धिसूरीश्वरपादपद्मेभ्यो नमः**
**आचार्यमहाराजश्रीमद्विजयमेघसूरीश्वरपादपद्मेभ्यो नमः**
**सद्गुरुदेवमुनिराजश्रीभुवनविजयपादपद्मेभ्यो नमः**

પૂજ્યપાદ ગુરુદેવ મુનિરાજ શ્રી ૧૦૦૮ **ભુવનવિજયજી** મહારાજાની પ્રેરણાથી સંશોધન-સંપાદન કરીને આજથી લગભગ ૧૪ વર્ષ પૂર્વે **સર્વસિદ્ધાંતપ્રવેશક** ગ્રંથને અમદાવાદથી પ્રકટ થતા **જૈનસત્યપ્રકાશ** નામના માસિકમાં છાપવા માટે મોકલી આપ્યો હતો. અને તે માસિકના ભિન્ન ભિન્ન અંકોમાં તે વખતે છપાયો હતો. પ્રસ્તુત ગ્રંથ આ વિષયના અભ્યાસીઓને અતિ ઉપયોગી થઈ શકે એ આશયથી એને સ્વતંત્ર ગ્રંથરૂપે છપાવવા માટે ગુરુદેવની ખાસ ઇચ્છા અને પ્રેરણા હતી. યોગ્ય સંસ્કારો સાથે આ ગ્રંથ પ્રકાશિત થાય તે પૂર્વે તો ગુરુદેવનો **શંખેશ્વરજી** તીર્થમાં સં. ૨૦૧૫ના મહાસુદિ આઠમે સ્વર્ગવાસ થયો. પછી તો માનસિક અને શારીરિક આદિ અનેક કારણોસર આ ગ્રંથને યોગ્ય સંસ્કાર આપીને પ્રકાશિત કરવાનું મારાથી બની શક્યું નહિ. હમણાં ઘણે વર્ષે પૂજ્ય ગુરુદેવની ઇચ્છા અને પ્રેરણાનું તીવ્ર સ્મરણ અને પુનઃ સંવેદન થયું એટલે એને યોગ્ય સંસ્કારો આપ્યા. અને પરમાત્માશ્રી **શંખેશ્વરપાર્શ્વનાથ** ભગવાનની કૃપાથી હવે આ ગ્રંથ પ્રકાશિત થઈ રહ્યો છે. આ રીતે ગુરુદેવની ઇચ્છા પૂર્ણ થવા સાથે આ અતિ ઉપયોગી ગ્રંથ અભ્યાસીઓના કરકમલમાં મૂકાય છે, એ મારે મન અતિ આનંદનો વિષય છે. અધ્યાપક અને અભ્યાસી બંને જો યોગ્ય હશે તો આ નાનો ગ્રંથ પણ ઘણું જ્ઞાન આપશે. અભ્યાસીઓ અમારી ભાવનાને સફળ કરે એ જ અભ્યર્થના.

નિવેદક

**પૂજ્યપાદાચાર્યમહારાજ શ્રીમદ્વિજયસિદ્ધિસૂરીશ્વરપટ્ટાલંકાર-**
**પૂજ્યપાદાચાર્યમહારાજ શ્રીમદ્વિજયમેઘસૂરીશ્વરશિષ્ય-**
**પૂજ્યપાદ ગુરુદેવ મુનિરાજ શ્રીભુવનવિજયાન્તેવાસી**
**મુનિ જંબૂવિજય**
**સં. ૨૦૨૦, પ્રથમ ચૈત્ર શુક્લાષ્ટમી, શ્રીશંખેશ્વરતીર્થ**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# उपक्रमः

## [ प्रथमसंस्करणगतः ]

**અહિંસા** એ જૈનદર્શનનું પરમતત્ત્વ છે. જૈનદર્શનની પ્રત્યેક આચાર પ્રણાલિકા તથા પ્રત્યેક વિચારધારા આ તત્ત્વથી ઓતપ્રોત થઈ ગયેલી છે. **शिवमस्तु सर्वजगतः परहितनिरता भवन्तु भूतगणाः । दोषाः प्रयान्तु नाशं सर्वत्र सुखीभवतु लोकः ॥** આ સર્વ જગતનું કલ્યાણ ઇચ્છનારી ભાવના એ અહિંસાદૃષ્ટિનો-જૈનદર્શનનો આદ્ય મુદ્રાલેખ છે. 'કોઈ પણ જીવનો પ્રાણથી વિયોગ ન કરવો' એવો સ્થૂલદૃષ્ટિએ જોતાં અહિંસા શબ્દનો અર્થ લાગે છે, પણ આપણે જેમ જેમ ઊંડાણ અને સૂક્ષ્મતા પૂર્વક વિચાર કરીએ તેમ તેમ એનો અર્થ ઘણો જ વ્યાપક અને ઉત્તરોત્તર સૂક્ષ્મ સૂક્ષ્મ બનતો જાય છે. રાગ, દ્વેષ અને મોહ સિવાય હિંસાનું બીજું કારણ જ ક્યું છે ? રાગ, દ્વેષ, મોહ તથા હિંસાનો પરસ્પર કાર્યકારણભાવ સંબંધ છે. એટલે જેમ જેમ રાગ, દ્વેષ, મોહ રહિત સ્થિતિ પ્રાપ્ત થતી જાય તેમ તેમ અહિંસાની સાધનામાં પણ ઉત્તરોત્તર પ્રગતિ થતી જાય છે અને છેવટે તે પૂર્ણ બને છે.

એક ચાર્વાક જેવા નાસ્તિકમતને બાદ કરતાં ભારતીય તમામ દર્શનોનો ઝોક હંમેશાં સત્યસાક્ષાત્કાર, આત્મસાક્ષાત્કાર યા મોક્ષ તરફ રહેલો છે, આથી જ ભારતીય તત્ત્વજ્ઞાનના વિચારોને વિવાદ કે તર્કનું નામ ન આપતાં તેને માટે दर्शन (સાક્ષાત્કાર) એવો ઉચ્ચકોટિનો યથાર્થ શબ્દ વાપરવામાં આવ્યો છે. दर्शन શબ્દનો અર્થ સાક્ષાત્કાર થાય છે. જે સત્યના સાક્ષાત્કારનો—આત્માના સાક્ષાત્કારનો—મોક્ષનો માર્ગ બતાવે તેનું નામ જ દર્શન. બાકીની ચર્ચાઓ વાણીવિલાસ માત્ર છે અને વિદ્વાનોના મનોરંજનનું (શોખનું) એ સાધન માત્ર છે. ભારતીય તત્ત્વજ્ઞાનનો આ આધ્યાત્મિક દૃષ્ટિકોણ હોવાને લીધે જ આપણે ત્યાં **सा विद्या या विमुक्तये** (=તે જ વિદ્યા છે કે જે મુક્તિનું કારણ છે.) તથા **ज्ञानस्य फलं विरतिः** (પાપકાર્યથી અટકવું-નિવૃત્ત થવું એ જ્ઞાનનું ફલ છે.) વગેરે સૂત્રો પ્રચારમાં આવ્યાં છે. સત્યનો સાક્ષાત્કાર કહો,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આત્માનો સાક્ષાત્કાર કહો યા મોક્ષ કહો, એ રાગ-દ્વેષ-મોહરહિત સમદૃષ્ટિ—પૂર્ણ અહિંસકદૃષ્ટિ સિવાય થઈ શકતો જ નથી. મુમુક્ષુને માટે સમદૃષ્ટિ-મધ્યસ્થભાવ બિલકુલ અનિવાર્ય જ છે. સમભાવી મનુષ્ય સત્યરૂપી સૂર્યના પ્રકાશને આત્મમંદિરમાં આવવા દેવા માટે મનનાં દ્વાર હંમેશા ખુલ્લાં રાખે છે. વસ્તુ જે જે સ્વરૂપે દેખાય તે બધાં રૂપે વસ્તુને સ્વીકારે છે. એક જ સ્વરૂપના એકાંતનો કદાપિ તે આગ્રહ ધરતો નથી.

સમદૃષ્ટિથી અવલોકન કરતાં જ્ઞાની પુરુષોને જણાયું કે ઢાલને બે બાજુ હોય છે તેમ એક જ વસ્તુને અનેક બાજુ હોવા છતાં પોતે માનેલી બાજુ સાચી અને બીજાએ માનેલી બાજુ ખોટી આ જાતના એકાંત આગ્રહથી લોકો નિરર્થક ઝગડી રહ્યા છે, અને દર્શનશાસ્ત્રો, જે આત્મ-સાક્ષાત્કારનું સાધન છે તે આત્મસાક્ષાત્કારનું સાધન મટીને પરસ્પર ઘોર ઝગડાનું—દ્વેષ અને વૈર વધારવાનું સાધન બની રહ્યાં છે. બીજાના દૃષ્ટિબિંદુમાં પણ રહેલા સત્યાંશનો સ્વીકાર કરવા જેટલી મનુષ્યમાં વિવેકબુદ્ધિ આવી જાય તો ઝગડાને સ્થાન જ ન રહે. આથી તેમણે જગતને ઉપદેશ આપ્યો કે—'બીજાના દૃષ્ટિબિંદુને સમજતાં શીખો, એક વસ્તુની ઘટમાન અનેક બાજુઓને તપાસો, જેટલી જે રીતે ઘટી શકતી હોય તેટલી તે રીતે સ્વીકારો, એકાંતનો આગ્રહ ન રાખો, અનેકાંતી બનો.' अन्त શબ્દનો અર્થ 'ધર્મ' થાય છે.[1] જો વસ્તુમાં અનેક अन्त-અનેક ધર્મો છે, તો એક જ અંતનો-એક જ ધર્મનો આગ્રહ રાખવો એ મિથ્યા છે. કોઈ કહે કે એક જ વસ્તુમાં પરસ્પર વિરુદ્ધ અનેક ધર્મોનો સમાવેશ શી રીતે થઈ શકે ? તો એના ઉત્તરમાં બૌદ્ધાચાર્ય ધર્મકીર્તિનું વચન ઘણું સુંદર છે કે—

**"यदीदं स्वयमर्थानां रोचते तत्र के वयम्[2] ॥" [ प्रमाणवार्तिक २।२१० ]**

---

૧. "अनेके बहवोऽन्ता अंशा धर्मा वा आत्मनः स्वरूपाणि यस्य तदनेकान्तात्मकम्। किं तत् ? वस्तु"—न्यायावतारवृत्ति पृ. ६४ ।

૨. આ કારિકાનું પૂર્વાર્ધ નીચે મુજબ છે—"किं स्यात् सा चित्रतैकस्यां न स्यात् तस्यां मतावपि ।"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પદાર્થોને જ જો અનેકધર્માત્મકત્વ-અનેકાન્તાત્મકત્વ પસંદ છે, તો તે આપણને ન ગમે તો ય આપણે શું કરી શકવાના છીએ ?

વસ્તુતઃ જો વિચાર કરીએ તો જે વિરોધ દેખાય છે તે વાસ્તવિક વિરોધ નથી, પણ વિરોધાભાસ છે. પુત્રપણું અને પિતાપણું પરસ્પર વિરુદ્ધ લાગે છે, પણ એક જ વ્યક્તિ પોતાના પુત્રની અપેક્ષાએ પિતા હોય અને પોતાના પિતાની અપેક્ષાએ પુત્ર હોય એમાં વિરોધ જેવું છે જ શું ?[1] તે જ પ્રમાણે માટીનો પિંડ મટીને જ્યારે ઘડો બને છે ત્યારે માટી પિંડરૂપે નાશ પામે છે, ઘડારૂપે ઉત્પન્ન થાય છે અને માટીરૂપે કાયમ રહે છે, એમ અપેક્ષા ભેદથી ઉત્પત્તિ, વિનાશ અને સ્થિરતા એક જ વસ્તુમાં ઘટી શકતાં હોય તો તેમાં વાંધા જેવું છે પણ શું ? જો આ વાતને સ્વીકારવામાં આવે તો વસ્તુને સર્વથા અવિનાશી માનનાર વેદાન્તી વગેરે અને સર્વથા વિનાશી માનનાર બૌદ્ધાનો ઝગડો આપોઆપ જ પતી જાય. તે જ રીતે 'ઘડો છે' એ જેટલું સાચું છે તેટલું જ 'ઘડો નથી' એ પણ સાચું છે. કારણ કે ઘડો ઘડારૂપે છે પણ વસ્ત્રરૂપે નથી. જો 'વસ્ત્રરૂપે નથી' એ વાતનો સ્વીકાર કરવામાં ન આવે તો વસ્ત્રની જેમ ઘડાનો પહેરવામાં-અંગ ઢાંકવામાં ઉપયોગ થવો જોઈએ, પણ નથી થતો. એટલે ઘડો વસ્ત્રરૂપે નથી, પણ ઘડારૂપે જ છે એ વાત માનવી જ જોઈએ. એટલે વસ્તુ એક અપેક્ષાએ છે પણ ખરી અને અન્ય અપેક્ષાએ નથી પણ ખરી. તે જ રીતે સજાતીયની અપેક્ષાએ સામાન્ય છે અને વિજાતીયની અપેક્ષાએ વિશેષ છે. જો આ દૃષ્ટિએ વસ્તુતત્ત્વનો વિચાર કરવામાં આવે તો દાર્શનિક શાસ્ત્રોમાં નિત્યત્વ-અનિત્યત્વ, સત્ત્વ-અસત્ત્વ, સામાન્યાત્મકત્વ-વિશેષાત્મકત્વ વગેરેના જે ભયંકર વિવાદો જોવામાં આવે છે તે આપોઆપ શમી જાય. એટલું જ નહીં, પણ જગતના તમામ વૈર-વિરોધના ઝેરને નિવારનારી આ અમૃતમયી

---

૧. આથી જ આચાર્યપ્રવર શ્રીમાન્ **સિદ્ધસેન દિવાકરજીએ** કહ્યું છે કે—જેના વિના લોકવ્યવહાર પણ કોઈ રીતે ચાલી શકતો નથી તે જગતના ગુરુસમાન અનેકાંતવાદને નમસ્કાર जेण विणा लोगस्स वि ववहारो सव्वहा न निव्वहइ। तस्स भुवणेक्कगुरुणो णमो अणेगंतवायस्स । [सन्मति ३।६९]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અનેકાંતદૃષ્ટિ છે. જૈનદર્શનનો પાયો આ દૃષ્ટિ ઉપર જ રચાયેલો છે, અને તે તેના સંપૂર્ણ અહિંસાના સિદ્ધાંતને અનુસરીને જ રચાયેલો છે.

આથી મુમુક્ષુને માટે આવશ્યક છે કે તેણે જગતમાં ચાલતા મુક્તિસંબંધી અનેક વિચારોનું—અનેક માર્ગોનું નિષ્પક્ષભાવે સમદૃષ્ટિથી અધ્યયન કરીને યુક્તિયુક્ત લાગતા માર્ગ ઉપર પોતાની નિશ્ચિત પ્રતીતિ સ્થાપવી જોઈએ. અનાદિકાલીન વાસનાથી અતિપ્રિય લાગતાં તમામ ઐહિક સુખોનો ત્યાગ કરીને જે મુક્તિના માર્ગે આગળ ધપવાનું છે તેમાં અનિશ્ચિત અથવા દોલાયમાન મનઃસ્થિતિ કામ ન લાગે. જેમ શારીરિક રોગનિવારણ માટે રોગ, રોગનું કારણ, આરોગ્ય તથા આરોગ્યસંપાદક ઔષધનું નિશ્ચિત જ્ઞાન જરૂરી છે તેમ આધ્યાત્મિક રોગનિવારણ માટે દુઃખ, દુઃખનું કારણ, દુઃખમાંથી છુટકારો મોક્ષ તથા મોક્ષના ઉપાયભૂત મોક્ષમાર્ગનું નિશ્ચિત જ્ઞાન નિતાંત આવશ્યક છે.

પરંતુ મોક્ષના ઉપાયની ચર્ચા કરતાં શાસ્ત્રોમાં ઐકમત્ય નથી અને તે એટલાં બધાં છે કે એ બધાંને જાણવા માટે ઘણો સમય અને પરિશ્રમ જોઈએ. જો એક જ સ્થળે ભિન્ન ભિન્ન મુખ્ય મુખ્ય દાર્શનિક વિચારોનો સંગ્રહ કરીને ગ્રંથરચના કરવામાં આવી હોય તો દર્શનશાસ્ત્રોનું અધ્યયન ઘણું સુગમ અને અલ્પસમયસાધ્ય થઈ જાય. તેમજ ભિન્ન ભિન્ન દાર્શનિક વિચારોની સ્વયં પરીક્ષા કરવાની પણ અનુકૂલતા પડે. સૌથી જૂનામાં જૂની આવી રચના પૂ. **સિદ્ધસેન દિવાકરજી**ની બત્રીશીઓમાં આપણને જોવા મળે છે. પૂ. **સિદ્ધસેન દિવાકર** પ્રણીત જે બાવીશ બત્રીશીઓ વર્તમાનમાં મળે છે તેમાં બારમીમાં ન્યાયદર્શનનું, તેરમીમાં સાંખ્યદર્શનનું, ચૌદમીમાં વૈશેષિકદર્શનનું, પંદરમીમાં બૌદ્ધદર્શનનું તથા સોળમીમાં નિયતિદર્શનનું સ્વરૂપ વર્ણવેલું છે. બાકીની એક યા બીજા સ્વરૂપે જૈનદર્શન સાથે સંબંધ ધરાવે છે, પરંતુ આ બત્રીશીઓ એટલી બધી કઠિન અને ગૂઢાર્થવાળી છે કે તેનાથી પંડિતજનોને પણ બોધ થવો મુશ્કેલ છે, પછી સામાન્ય મનુષ્યની વાત જ ક્યાં રહી ? પરંતુ ત્યાર પછી યાકિનીમહત્તરાસૂનુ પૂ. **શ્રીહરિભદ્રસૂરિ** મહારાજે રચેલો **ષડ્દર્શનસમુચ્ચય** નામનો આ વિષેનો

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ગ્રંથ એટલો બધો સુંદર અને ઉત્તમ કોટિનો છે કે એનાથી દર્શનશાસ્ત્રોનું જ્ઞાન બહુ સહેલાઈથી પ્રાપ્ત કરી શકાય છે. અત્યારે કેટલાક વિશ્વવિદ્યાલયોમાં (યુનિવર્સિટીઓમાં) દર્શનશાસ્ત્રની એમ. એ.ની પરીક્ષામાં પણ આ ગ્રંથ અભ્યાસક્રમમાં ફરજિયાત નિયુક્ત થયેલો છે, એના ઉપરથી પણ આની ઉપયોગિતાની તથા લોકપ્રિયતાની સહેલાઈથી ખાતરી થઈ જશે. આનું સર્વપ્રથમ પ્રકાશન પણ બંગાલની રોયલ એશિયાટિક સોસાયટી તરફથી જ થયેલું છે.

જો કે **માધવાચાર્યે** (વિક્રમની ૧૫મી સદી આસપાસ) પૂ. **શ્રીહરિભદ્રસૂરિ** મહારાજની પદ્ધતિને અનુસારે **સર્વદર્શનસંગ્રહ** નામના એક વિસ્તૃત ગ્રંથની રચના કરી છે. તેમાં ૧૬ દર્શનોનો સંગ્રહ છે. તેમ જ આ પદ્ધતિના **સર્વસિદ્ધાન્તસંગ્રહ** વગેરે ગ્રંથો પણ રચાયા છે. પરંતુ તેમાં એક ખામી એ છે કે તેમાં એવી રીતે રચના કરવામાં આવી છે કે પોતાને અત્યંત અનિષ્ટ લાગતા **ચાર્વાક જેવા દર્શનને** પહેલું મૂકવામાં આવ્યું છે, ત્યાર પછી એના ખંડનરૂપે **બૌદ્ધદર્શનને** બીજું મૂકવામાં આવ્યું છે, બૌદ્ધોના ખંડનરૂપે **જૈનદર્શનને** ત્રીજું મૂકવામાં આવ્યું છે, જૈનોના ખંડન માટે **રામાનુજદર્શનને** ચોથું મૂકવામાં આવ્યું છે. આ રીતે એક એકના ખંડનમાં ઉત્તરોત્તર દર્શન મૂકવામાં આવ્યાં છે, અને છેવટે પોતાને માન્ય **શાંકરદર્શનને** (અદ્વૈતદર્શન) સર્વશ્રેષ્ઠ દર્શનરૂપે મૂકવાનો પ્રયાસ કરવામાં આવ્યો છે. આથી શાંકરભિન્ન દર્શનના અનુયાયીની લાગણી દુભાયા વિના રહે જ નહીં. જ્યારે **ષડ્દર્શનસમુચ્ચયમાં** કોઈ પણ દર્શનને ખોટું કે સાચું ઠરાવવામાં આવ્યું જ નથી. આથી કોઈ પણ દર્શનના અનુયાયીને એ વાંચવું અતિપ્રિય લાગે છે. **ષડ્દર્શનસમુચ્ચયની** લોકપ્રિયતાનું આ પણ ખાસ કારણ છે. આનાથી સર્વદર્શનોનું માણસને જ્ઞાન પણ થાય છે અને સાથે સાથે મધ્યસ્થભાવે દર્શનોની યોગ્યાયોગ્યતાનો સ્વયંનિર્ણય કરવાની પૂરતી અનુકૂલતા પણ મળે છે.

## દર્શનોની સંખ્યા

દર્શનોની સામાન્ય રીતે 'છ'ની પ્રસિદ્ધ છે. વસ્તુતઃ 'છ'ની

Jain Education International For Private & Personal Use Only www.jainelibrary.org

સંખ્યાનો કોઈ નિયમ નથી. કાળક્રમે અનેક નવાં નવાં દર્શનો ઊભાં થાય છે અને અનેક પ્રાચીન દર્શનો કાળના ઉદરમાં સમાતાં જાય છે-સમાઈ ગયાં છે. છતાં કોઈક વખતે અમુક અપેક્ષાથી દર્શનોના છ મુખ્ય ભેદો અસ્તિત્વ ધરાવતા હશે ત્યારથી [1]**ષડ્દર્શન** એવો શબ્દ રૂઢ થઈ ગયો છે કે જે હજુ પણ વાપરવામાં આવે છે. ષડ્દર્શનોમાં ક્યાં ક્યાં છ દર્શન ગણવાં એ વિશે પણ એકમત નથી. કોઈ ૧. બૌદ્ધ, ૨. ન્યાય, ૩. સાંખ્ય, ૪. જૈન, ૫. વૈશેષિક તથા ૬. જૈમિનીય (મીમાંસા) એમ છ દર્શન ગણે છે, કોઈ ન્યાય-વૈશેષિકને એક માનીને ચાર્વાક દર્શન ઉમેરીને 'છ'ની સંખ્યા પૂરી કરે છે,[2] કોઈ સાંખ્ય, જૈન, બૌદ્ધ, ચાર્વાક, વૈશેષિક અને ન્યાય એમ પણ છ ગણે છે,[3] ત્યારે કોઈ સાંખ્ય, વૈશેષિક, ન્યાય, યોગ, પૂર્વમીમાંસા (જૈમિનિદર્શન) તથા ઉત્તરમીમાંસા (વેદાંત) એમ છ દર્શન[4] વેદને પ્રમાણ માનતાં હોવાથી આસ્તિક દર્શન છે, અને સૌત્રાંતિક, વૈભાષિક, યોગાચાર અને માધ્યમિક આ ચાર

---

૧. "दर्शनानि षडेवात्र मूलभेदव्यपेक्षया । देवता-तत्त्वभेदेन ज्ञातव्यानि मनीषिभिः ॥२॥ बौद्धं नैयायिकं साङ्ख्यं जैनं वैशेषिकं तथा । जैमिनीयं च नामानि दर्शनानाममून्यहो ॥३॥"—षड्दर्शनसमुच्चयः ।

૨. "नैयायिकमतादन्ये भेदं वैशेषिकैः सह । न मन्यन्ते मते तेषां पञ्चैवास्तिकवादिनः ॥७८॥ षष्ठदर्शनसङ्ख्या तु पूर्यते तन्मते किल । लोकायतमतक्षेपात् कथ्यते तेन तन्मतम् ॥७९॥"—षड्दर्शनसमुच्चयः ॥

૩. "न्यायस्तर्कोऽनुमानं सोऽस्मिन्नेव व्युत्पाद्यते, यतः साङ्ख्यार्हतानां तावत् क्षपणकानां कीदृशमनुमानोपदेशकौशलं कियदेव तत्तर्केण वेदप्रामाण्यं रक्ष्यते इति नासाविह गणनार्हः । बौद्धास्तु यद्यपि अनुमानमार्गावगाहननैपुण्याभिमानोद्धुरां कन्धरामुद्वहन्ति, तथापि वेदविरुद्धत्वात्तत्तर्कस्य कथं वेदादिविद्यास्थानस्य मध्ये पाठः ? अनुमानकौशलमपि कीदृशं शाक्यानामिति पदे पदे दर्शयिष्यामः । चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एवेति कः क्षुद्रतर्कस्य तदीयस्येह गणनावसरः । वैशेषिकाः पुनरस्मदनुयायिन एवेत्येवमस्यां जनतासु प्रसिद्धायामपि षट्तर्क्यामिदमेव तर्कन्यायविस्तरशब्दाभ्यां शास्त्रमुक्तम्"—जयन्तभट्टरचिता न्यायमञ्जरी पृ० ४. (ચૌખંબા સીરીઝ બનારસ) ॥

૪. कपिलस्य कणादस्य गौतमस्य पतञ्जलेः । व्यासस्य जैमिनेश्चापि शास्त्राण्याहुः षडेव हि ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

બૌદ્ધદર્શનના ભેદો અને જૈન તથા ચાર્વાક મળીને છ નાસ્તિક[1] દર્શન છે, કેમકે તે વેદને પ્રમાણભૂત માનતાં નથી, આ જાતની ગણના કરનારા પણ છે.[2]

દર્શનોની સંખ્યાની ગણના કર્યા સિવાય મુખ્ય મુખ્ય સર્વસિદ્ધાંતોનું નિરૂપણ કરતો सर्वसिद्धान्तप्रवेशक નામનો આ ગ્રંથ અદ્યાવધિ સ્વતંત્રરૂપે અપ્રકાશિત જ છે. આમાં નૈયાયિક, વૈશેષિક, જૈન, સાંખ્ય, બૌદ્ધ, મીમાંસક તથા ચાર્વાક એમ સાત દર્શનોનું નિરૂપણ છે. ષડ્દર્શનસમુચ્ચય પદ્યાત્મક છે, જ્યારે આ ગદ્યાત્મક છે. **સર્વસિદ્ધાંતપ્રવેશક**ની રચનાશૈલી અતિવિસ્તૃત ન હોવાથી તેમ જ અતિસંક્ષિપ્ત પણ ન હોવાથી, ઉપરાંત ભાષા અને પ્રતિપાદન શૈલી અત્યંત મનોહર હોવાથી દર્શનોનું જ્ઞાન મેળવવા માટે આ ઉત્તમ ગ્રંથ છે. આથી આ ગ્રંથને પ્રગટ કરવાની ભાવનાથી આ ઉપક્રમ કરવામાં આવ્યો છે.

આ ગ્રંથને શોધી કાઢવાનો યશ આગમ પ્રભાકર પૂ. મુનિરાજ **શ્રીપુણ્યવિજયજી** મહારાજને જ ફાળે જાય છે. તેઓશ્રીએ પોતાની આખી જિંદગી પ્રાચીન સાહિત્યના સંશોધન પાછળ જ અર્પણ કરી દીધી છે. જૈનસમાજ તેમના આ પુણ્યકાર્યથી સારી રીતે પરિચિત છે, એટલે વિશેષ કંઈ લખવાની જરૂર જેવું નથી. અનેક કષ્ટો ઉઠાવીને, **જેસલમેર**ની રણભૂમિમાં જઈને, અત્યાર સુધી વ્યવસ્થિત રીતે કદી નહીં તપાસાયેલા આખા પ્રાચીન ગ્રંથસંગ્રહના પાનેપાનાંને તેમણે તપાસ્યાં છે.

---

૧. "शून्यवादेनैकं प्रस्थानं माध्यमिकानाम्, क्षणिकबाह्यार्थवादेनापरं सौत्रान्तिकानाम्, प्रत्यक्षस्वलक्षणक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणाम् । एवं सौगतानां प्रस्थान-चतुष्टयम् । तथा देहात्मवादेन एकं प्रस्थानं चार्वाकाणाम्, एवं देहातिरिक्त-देहपरिमाणात्मवादेन द्वितीयं प्रस्थानं दिगम्बराणाम् । एवं मिलित्वा नास्तिकानां षट् प्रस्थानानि ।"—मधुसूदनसरस्वतीरचिते प्रस्थानभेदे—पृ० १॥

૨. વસ્તુતઃ જીવ, પરલોક, પુણ્ય, પાપ અને મોક્ષાદિ માને તે આસ્તિક અને ન માને તે નાસ્તિક આ જ સાચી આસ્તિક-નાસ્તિકની વ્યાખ્યા છે. વેદને પ્રમાણભૂત માનવા કે ન માનવા એ કંઈ આસ્તિકતા કે નાસ્તિકતાનો માપદંડ નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

તેમાં અનેક ગ્રંથરત્નો પણ તેમને પ્રાપ્ત થયાં છે. કેટલાક સર્વથા અપ્રકાશિત છે, જ્યારે કેટલાક ગ્રંથો પ્રકાશિત છે પણ તેમાં લેખક આદિના દોષોથી પેસી ગયેલી અશુદ્ધિઓને દૂર કરવા માટે અત્યંત ઉપયોગી છે. જ્યારે એ ગ્રંથો પ્રકાશિત થશે ત્યારે જ જનતાને એની સાચી મહત્તાની કલ્પના આવશે. પ્રસ્તુત **સર્વસિદ્ધાંતપ્રવેશક** ગ્રંથ પણ આ પૈકીનો જ એક છે. જેસલમેરની A તથા B પ્રતિ ઉપરથી પાઠાંતરો નોંધીને **સર્વસિદ્ધાંતપ્રવેશક** ગ્રંથની સ્વહસ્તે કરેલી જે નકલ મુનિરાજ **શ્રીપુણ્યવિજયજી** મહારાજે મારા ઉપર મોકલી આપેલી તેને આધારે જ આ સંપાદન કરવામાં આવ્યું છે. મને યોગ્ય લાગ્યો તે પાઠ મૂળમાં રાખીને બીજા પાઠને નીચે ટિપ્પણમાં પાઠાંતર રૂપે દર્શાવેલો છે. તે તે દર્શનના મૂળભૂત ગ્રંથો સાથે તુલના પણ યથાયોગ્ય કરવાનો પ્રયત્ન કર્યો છે. આ ગ્રંથના કર્તા જૈન જ છે, પણ તેમનું નામ જોવામાં આવતું નથી. બંને પ્રતિ તાડપત્ર ઉપર લખેલી છે. B પ્રતિ વિક્રમસંવત્ ૧૨૦૧માં લખેલી છે. A પ્રતિ તેનાથી પણ પ્રાચીન છે. જ્યાં મૂળ હસ્તલિખિત પાઠ અશુદ્ધ જેવો લાગ્યો છે, ત્યાં મને શુદ્ધ લાગતો પાઠ (   ) આવા વર્તુલ કૌંસમાં આપ્યો છે. સ્પષ્ટીકરણાદિ માટે મેં ઉમેરેલો પાઠ [   ] આવા ચતુષ્કોણ કૌંસમાં આપ્યો છે.

આગમપ્રભાકર મુનિરાજ શ્રી **પુણ્યવિજયજી** મહારાજે આ ગ્રંથનું સંપાદન કરવાની સામગ્રી અને તક આપી તે બદલ હું તેમનો અત્યંત આભારી છું.

આ ગ્રંથના અભ્યાસીઓને ભિન્ન ભિન્ન દર્શનોના મુખ્ય સિદ્ધાંતોના જ્ઞાન સાથે પૂર્ણ સમભાવ તરફ લઈ જનારી અનેકાન્તદૃષ્ટિ પણ પ્રાપ્ત થાઓ એ જ શુભેચ્છા.

—નિવેદક—

**પૂજ્યપાદાચાર્ય મહારાજ શ્રીમદ્વિજયસિદ્ધિસૂરીશ્વરપટ્ટાલંકાર-**
**પૂજ્યપાદાચાર્ય મહારાજ શ્રીમદ્વિજયમેઘસૂરીશ્વરશિષ્ય-**
**પૂજ્યપાદ ગુરુદેવ મુનિરાજ શ્રીભુવનવિજયાન્તેવાસી**
**મુનિ જંબૂવિજય**
**સં. ૨૦૨૦, પ્રથમ ચૈત્ર સુદિ અષ્ટમી, શ્રી શંખેશ્વરતીર્થ.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# उपयुक्तग्रन्थसूचिः संकेतविवरणं च


**अनेकान्तजयपताकाटीका** ओरिएण्टल इन्स्टीट्यूट, वडोदरा

**[ जै० सू०= ] जैमिनिसूत्र**

**[ तत्त्वसं० पं०= ] तत्त्व-संग्रहपञ्जिका** ओरिएण्टल इन्स्टीट्यूट, वडोदरा

**तत्त्वार्थसूत्र**

**[ धर्मसं० वृ० ] धर्मसंग्रहणीवृत्ति** सुरत

**नयचक्रवृत्ति** जैन आत्मानंदसभा, भावनगर

**न्यायकलिका** सरस्वतीभवनं, वाराणसी

**न्यायकुमुदचन्द्र** माणिक्यचन्द्र दि० जैनग्रन्थमाला, मुंबई

**न्यायबिन्दु** काशीप्रसाद जयस्वाल इन्स्टीट्यूट, पटना

**[ न्या० सू०= ] न्यायसूत्र**

**न्यायभाष्य** चौखंबा, वाराणसी

**[ न्या० मं०= ] न्यायमञ्जरी** चौखंबा, वाराणसी

**[ न्यायवा०= ] न्यायवार्तिक** कलकत्ता संस्कृतसीरिज, कलकत्ता

**[ न्यायवा० ता०= ] न्यायवार्तिकतात्पर्यटीका** कलकत्ता संस्कृतसीरीज, कलकत्ता

**न्यायावतार** जैनश्वेताम्बरकोन्फरन्स, मुंबई

**न्यायावतारटीका** जैनश्वेताम्बरकोन्फरन्स, मुंबई

**न्यायवतारवार्त्तिकतात्पर्यवृत्ति** सिंघीजैनग्रन्थमाला मुंबई

**पातञ्जलयोगदर्शनभाष्य** चौखम्बा, वाराणसी

**[ प्र० मी०= ] प्रमाणमीमांसा** सिंघीजैनग्रन्थमाला, मुंबई

**प्रमाणवार्तिक** Journal of the Bihar & Orissa Research Society पटना


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | |
|---|---|
| [प्र० समु०=] **प्रमाणसमुच्चयः** | जैन आत्मानंद सभा, भावनगरतः प्रकाशिते नयचक्रे प्रथमविभागे भोटपरिशिष्टरूपः |
| [प्र०भा०=] **प्रशस्तपादभाष्य** | चौखंबा, वाराणसी |
| [प्र०भा०व्यो०=] **प्रशस्तपादभाष्यव्योमवतीटीका** | चौखंबा, वाराणसी |
| [प्र०भा०सू०=] **प्रशस्तपादभाष्यसूक्तिटीका** | चौखंबा, वाराणसी |
| [प्र०भा०से०=] **प्रशस्तपादभाष्यसेतुटीका** | चौखंबा, वाराणसी |
| **प्रस्थानभेद** | आनंदाश्रम, पुना |
| [बृह०सू०=] **बृहस्पतिसूत्र** | |
| **ब्रह्मसूत्र शांकरभाष्य** | निर्णयसागर प्रेस, मुंबई |
| [मी०श्लो०वा०=] **मीमांसाश्लोकवार्तिक** | चौखंबा, वाराणसी |
| [वै०सू०=] **वैशेषिकसूत्र** | ओरिएण्टल इन्स्टीट्यूट, वडोदरा |
| **शास्त्रावार्तासमुच्चय** | गोडीजी, मुंबई |
| [शास्त्रवा०स्वो०=] **शास्त्रवार्तासमुच्चय-स्वोपज्ञवृत्ति** | गोडीजी, मुंबई |
| [षड्द०=] **षड्दर्शनसमुच्चय** | जैनआत्मानंदसभा, भावनगर |
| [षड्द०=] **षड्दर्शनसमुच्चयबृहद्वृत्ति** | जैनआत्मानंदसभा, भावनगर |
| **सन्मतितर्क** | गुजरात विद्यापीठ, अमदावाद |
| **सर्वदर्शनसंग्रह** | आनन्दाश्रम, पुना |
| [सांख्यका०=] **सांख्यकारिका** | चौखंबा, वाराणसी |
| **सांख्यकारिका माठरवृत्ति** | चौखंबा, वाराणसी |
| **सांख्यकारिका युक्तिदीपिकावृत्ति** | कलकत्ता |
| **सांख्यकारिकावृत्ति (हस्तलिखित)** | जेसलमेर |
| [सिद्ध०द्वा०=] **सिद्धसेनदिवाकर-प्रणीता द्वात्रिंशिका** | जैनआत्मानंदसभा, भावनगर |
| [स्या०र०=] **स्याद्वादरत्नाकर** | जैनआत्मानंदसभा, भावनगर |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वसिद्धान्तप्रवेशकस्य

# विषयानुक्रमः


| विषयः | पृष्ठक्रमाङ्कः |
|---|---|
| नैयायिकदर्शनम् | २ |
| वैशेषिकदर्शनम् | ५ |
| जैनदर्शनम् | १२ |
| साङ्ख्यदर्शनम् | १३ |
| बौद्धदर्शनम् | १७ |
| मीमांसकदर्शनम् | १८ |
| लोकायतिकमतम् | २० |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरन्तनजैनमुनीश्वरप्रणीतः

# सर्वसिद्धान्तप्रवेशकः

॥ नमः सर्वज्ञाय ॥

**सर्वभावप्रणेतारं प्रणिपत्य जिनेश्वरम् ।**
**वक्ष्ये [१]सर्ववि( नि )गमेषु यदिष्टं तत्त्वलक्षणम्[२] ॥१॥**
**सर्वदर्शनेषु प्रमाण-प्रमेयसमुच्चयप्रदर्शनायेदमु[३]पदिश्यते ।**

---

## टिप्पणानि

**श्रीशङ्खेश्वरपार्श्वं** सद्गुरुदेवांश्च **भुवनविजयाख्यान्** ।
प्रणिपत्य परमभक्त्या टिप्पणमिह तन्यते किञ्चित् ॥

सर्वदर्शनसिद्धान्तेषु सम्यक् प्रवेशकतया यथार्थाभिधस्य चिरन्तनेन केनचिज्जैनमुनिप्रवरेण रचितस्यास्य **सर्वसिद्धान्तप्रवेशक**ग्रन्थस्य तालपत्रेषु लिखितं यत् प्रतिद्वयं **जेसलमेरनगरे** जैनज्ञानभाण्डागारे विद्यते तदवलम्ब्य सम्पादितोऽयं ग्रन्थः । तत्रैका प्रतिर्विक्रमसंवत् १२०१ वर्षे लिखिता "९ १/२ x १ १/२" 'इंच' प्रमिता B इति संज्ञयात्र व्यवहृता । अस्यां प्रतौ **दिङ्नागरचितो न्याय**प्रवेशकः (पत्र १-१७), **सर्वसिद्धान्तप्रवेशकः** (पत्र १७-४१), **हरिभद्र**सूरिविरचिता **न्याय**प्रवेशकटीका (पत्र ४२-१३४) इति ग्रन्थत्रयं विद्यते । अपरा त्वितोऽपि प्राचीना जीर्णप्राया १७ पत्रात्मिका "१२ ३/४ x १ १/२" इंच (Inch) प्रमिता प्रतिः A संज्ञयात्र व्यवहृता । एवं च A-B प्रत्योर्मध्ये ये उपयोगिनः पाठभेदास्तेऽत्र A संकेतेन B संकेतेन वोपन्यस्ताः । स्पष्टीकरणाद्यर्थमुपयोगीनि टिप्पणानि च निवेश्य सम्पादितोऽयं ग्रन्थो देव-गुरुकृपाबलात् ॥

१. सर्वनिगमेषु सर्वसिद्धान्तेष्विति भावः । "गमनं गमः परिच्छेद इत्यर्थः । निश्चितो गमो निगमः ।" -**न्यायावतारवृत्ति** पृ० ७५ । "निगमाः पूर्वणिग्वेदनिश्चयाध्ववणिक्पथाः ।" -**हैमकोशः** ॥ २. इदं मङ्गलपद्यं B प्रतौ नास्ति ॥ ३. **°मपदि°** A ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## [ नैयायिकदर्शनम् ]

तत्र **नैयायिकदर्शने** तावत् ''प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-ऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानाद्[१] निःश्रेयसाधिगमः'' [न्यायसूत्र १।१।१] ।

अस्य व्याख्या—प्रणीयतेऽनेनेति प्रमाणम्[२] । तस्य च[३] सामान्य-लक्षणम्-अर्थोपलब्धिहेतुः[४] प्रमाणम् । उपलब्धिश्च[५] हानादिबुद्धिः[६] । तच्चतुर्धा, तद्यथा-''प्रत्यक्ष-ऽनुमानो-पमान-शब्दाः प्रमाणानि'' [न्या० सू० १।१।३] । तत्र प्रत्यक्षम्—इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्य-पदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्'' [न्या० सू० १।१।४।] । अस्य गमनिका—इन्द्रियाणि घ्राणादीनि, अर्था[७] घटादयो गन्धादयश्च, तेषां सन्निकर्षः सम्बन्धः, तस्मात् सन्निकर्षादुत्पन्नम्, नाऽभिव्यक्तम्[८], ततश्च साङ्ख्यमतव्यवच्छेदः । ज्ञानग्रहणात् सुखादिव्यवच्छेदः । तच्च[९] शब्देन व्यपदिश्यमानं शाब्दं प्रसज्यते[१०], तेनोच्यते-अव्यपदेश्यमिति । तथा तदेव ज्ञानं व्यभिचार्यपि भवति, तेनेह 'अव्यभिचारि' इति । 'व्यवसायात्मकम्' निश्चयस्वभावम्, ततश्च संशयज्ञानव्यवच्छेदः । 'प्रत्यक्षम्' इति लक्ष्यनिर्देशः ॥

अनुमानम्—''**तत्पूर्वकं त्रिविधमनुमानम्—पूर्ववत्, शेषवत्,**

---

१. **तत्त्वपरिज्ञानाद्** A ॥ २. ''प्रमीयतेऽनेनेति प्रमाणम्''-**न्यायकलिका०** पृ० १ ॥ ३. **च** B मध्ये नास्ति ॥ ४. ''उपलब्धिहेतुश्च प्रमाणम् ।'' —**न्यायभाष्य** २।१।१। **न्यायवार्तिक०** पृ० १५ । ''अर्थोपलब्धिहेतुः स्यात् प्रमाणं तच्चतुर्विधम् ।'' —**षड्दर्शनसमुच्चय** ॥१६॥ ''अर्थोपलब्धिहेतुः प्रमाणम्' इति नैयायिकादयः''—**न्यायावतारवृत्ति०** पृ० ९। **प्रमाणमीमांसा** १।१।८॥ **५. °श्चेह बुद्धि तच्चतुर्धा तद्यथा** B । **°श्च हानादिबुद्धिः तद्यथा** A ॥ ६. ''प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा ।''—**न्यायभाष्य०** ॥ ७. ''गन्ध-रस-रूप-स्पर्श-शब्दाः पृथिव्यादिगुणास्तदर्थाः'' —**न्यायसूत्र०** १।१।१४। ''पृथिव्यादीनि गुणाश्चेति द्वन्द्वसमासः ।'' —**न्यायवार्तिक** पृ० २०५ ॥ **८. अभिव्यक्तम्** A ॥ **९. अतश्छब्देन** B ॥ **१०. प्रयुज्यते** A ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सामान्यतो दृष्टं च**" [न्या० सू० १।१।५] इति । **तत्पूर्वक**मिति प्रत्यक्षपूर्वकम् । **त्रिविध**मिति लिङ्गविभागः । **पूर्वव**दिति कारणात् कार्यानुमानम्, यथा मेघोन्नतिदर्शनाद् भविष्यति वृष्टिरिति । **शेषव**दिति कार्यात् कारणानुमानम्, यथा विशिष्टाद् नदीपूरदर्शनात् 'उपरि वृष्टो देवः' इति गम्यते । **सामान्यतो दृष्टं** नाम यथा देवदत्तादौ गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्य आदित्येऽपि समधिगम्यते ॥

"प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्" [न्या० सू० १।१।६] । प्रसिद्धो गौः, तेन सह यत्[1] **साधर्म्यं** सामान्यं ककुद-खुर-विषाणादि-मत्त्वम्, तस्मात् साधर्म्यात्[2] **साध्यस्य** गवयस्य **साधनमुपमानम्**, यथा गौः तथा गवय इति । किं[3] पुनरत्रोपमानेन क्रियते ? संज्ञा-संज्ञिसम्बन्धप्रतिपत्तिरुपमानार्थः ॥

अथ कः शब्दः ? "**आप्तोपदेशः शब्दः**" [न्या० सू० १।१।७] । **आप्तः**[4] खलु साक्षात्कृतधर्मा, तेन य उपदेशः क्रियते स आप्तोपदेश आगमः शब्दाख्यं प्रमाणमित्युच्यते ॥

किं पुनरत्रानेन प्रमाणेनार्थजातं मुमुक्षुणा प्रमेयम् ? तदुच्यते— आत्म-शरीरेन्द्रिया-ऽर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःखा[5]-ऽपवर्गास्तु प्रमेयम्" [न्या० सू० १।१।९] ॥

अथ संशयः-किंचि[6](स्वि)दित्यनवधारणात्मकः प्रत्ययः संशयः ।

---

१. **यत्** नास्ति B ॥ २. **साधर्म्यतः** B ॥ ३. "किं पुनरत्रोपमानेन क्रियते ?....समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थः"-**न्यायभाष्य** १।१।६॥ ४. **आप्तश्च** B ॥ "आप्तः खलु साक्षात्कृतधर्मा"-**न्यायभाष्य** १।१।७॥ ५. **°दुःखसुखा°** A॥ ६. **किमित्य°** B ॥ "स्थाणु-पुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन् पूर्वदृष्टं च तयोर्विशेषं बुभुत्समानः 'किंस्वित्' इत्यन्यतरं नावधारयति तदनवधारणं ज्ञानं संशयः"-**न्यायभाष्य १।१।२३**। 'किंस्वित्' इति विमर्शः संशयः ।"— **न्यायकलिका, पृ० ८** । "'किंस्वित्' इति वस्तुविमर्शमात्रमनवधारणं ज्ञानं संशयः।" —**न्यायभाष्य १।१।१**। "'किंस्वित्' इति दोलायमानस्य उभय-कोटिस्पृशः प्रत्ययस्याऽर्थेऽनवधारणात्मकस्य"—**न्यायवार्तिक-तात्पर्यटीका० पृ० ३६** ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा-मन्दमन्दप्रकाशे स्थाणु[१]-पुरुषोचिति(त)भूभागे 'स्थाणुः स्यात् पुरुषः स्यात्' इति ॥

अथ प्रयोजनम्-येन प्रयुक्तः प्रवर्तते तत् प्रयोजनम् ॥

अथ दृष्टान्तः-अविप्रतिपत्तिविषयापन्नोऽर्थो दृष्टान्तः, यथा अनित्याद्यर्थविचारे[२] घटाद्याकाशादिरिति ॥

अथ सिद्धान्तः । स च चतुर्विधः, तद्यथा-सर्वतन्त्रसिद्धान्तः १, प्रतितन्त्रसिद्धान्तः २, अधिकरणसिद्धान्तः ३, अभ्युपगमसिद्धान्तश्चेति ४ ॥

अथावयवाः—"प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि अवयवाः" [न्या० सू० १।१।३२] । तत्र 'अनित्यः शब्दः' इति प्रतिज्ञा । 'उत्पत्तिधर्मकत्वात्' इति हेतुः । 'घटवत्' इत्युदाहरणम् ।★ इह[३] यद् यदुत्पत्तिधर्मकं तत् तदनित्यं दृष्टम्, यथा घटः, व्याप्तिदृ(र्द)ष्टान्तानुपातिनी★ । तथा चोत्पत्तिधर्मकः शब्द इत्युपनयः । तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम् । वैधर्म्योदाहरणेऽपि★ इह[३] यदनित्यं न भवति तदुत्पत्तिधर्मकमपि न भवति, यथा आकाशम्, ★न च तथाऽनुत्पत्तिधर्मकः शब्द इति, तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम्[४] ॥

संशयादूर्द्ध्वं[५] भवितव्यताप्रत्ययस्तर्कः, यथा भवितव्यमत्र स्थाणुना पुरुषेण वेति ॥

---

१. **स्थाणुः पुरुषो वेति भूभागे** B ॥ २. 'अनित्य' साधने साधर्म्योदाहरणत्वेन घटादेः वैधर्म्योदाहरणत्वेन आकाशादेश्च सर्वथौचित्यात् 'अनित्याद्यर्थविचारे' इति पाठः रमणीय एव । दृश्यताम्. **न्यायभाष्य १।१।३६, ३७** । ३. ★★एतच्चिह्नान्तर्गतः पाठः B प्रतौ नास्ति ॥ ४. **निगमनम्** A प्रतौ नास्ति ॥ ५. तुलना—"भवितव्यमिति य ऊहः स तर्कः"—**न्यायवार्तिक** पृ० ३२६ ॥ "अनवधारणात्मकः प्रत्ययः संशयः 'किंस्वित्' इति । अवधारणात्मकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संशय-तर्काभ्यामूर्ध्वं निश्चितः प्रत्ययो निर्णयः ॥

तिस्रः कथाः—वादो जल्पो वितण्डा । तत्र शिष्या-ऽऽचार्ययोः पक्षप्रतिपक्षपरिग्रहेण अभ्यासख्यापनाय वादकथा ॥

विजिगीषुणा सार्द्धं "छल-जाति-निग्रहस्थानसाधनोपालम्भो[1] जल्पः" [न्या० सू० १।२।२] ॥

स्वपक्षस्थापनाहीनो वितण्डा ॥ अनैकान्तिकादयो[2] हेत्वाभासाः ॥

नवकम्बलो देवदत्त[3] इत्यादिच्छलम् ॥ दूषणाभासास्तु जातयः ॥

निग्रहस्थानानि पराजयवस्तूनि । तद्यथा—"प्रतिज्ञाहानिः, प्रतिज्ञान्तरम्, प्रतिज्ञाविरोधः, प्रतिज्ञासंन्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थम्[4], अपार्थकम्, अप्राप्तकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अप्रतिज्ञानम्, अप्रतिभा, विक्षेपः[5], मतानुज्ञा, पर्यनुयोज्योपेक्षणम्[6], निरनुयोज्यानुयोगः[7], अपसिद्धान्तः, हेत्वाभासाश्चेति[8] निग्रहस्थानानि" [न्या० सू० ५।२।१] ॥

इति[9] नैयायिकदर्शनं[10] समाप्तम् ॥

# [ वैशेषिकदर्शनम् ]

अथ वैशेषिकतन्त्रसमासप्रतिपादनायाह-द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां तत्त्वज्ञानान्निःश्रेयसाधिगमः । तत्र नव **द्रव्याणि**-

---

प्रत्ययः 'एवमिदम्' इति निर्णयः । अयं तु संशयात् प्रच्युतः कारणोपपत्तिसामर्थ्यात्.....निर्णयं चाप्राप्तो विशेषादर्शनात् ।"—**न्यायवार्तिक** पृ० ३२७ ॥

१. °**पलम्भो** A ॥ २. **अनेकान्तादयो** B ॥ ३. °**दत्तादिच्छ**° B ॥ ४. °**र्थकम्** A ॥ ५. **कथाविक्षेपः** A ॥ ६. °**योगोपे**° A ॥ ७. °**योगानु**° A ॥ ८. °**सश्चेति** B ॥ ९. **इति** A नास्ति ॥ १०. °**कमतं स**° A ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि" [वै० सू० १।१।४] ।

तत्र पृथिवीत्वयोगात् पृथिवी । सा च द्विधा-नित्या[1] चानित्या च। तत्र परमाणुलक्षणा नित्या, कार्यलक्षणा त्वनित्या । सा च चतुर्दश-गुणोपेता, तद्यथा- रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-द्रवत्व-वेगैश्चतुर्दशभिर्गुणै[2]-र्गुणवती ॥

"अप्त्वाभिसम्बन्धादापः" [प्र० भा० पृ० १४] । ताश्च रूप-रस-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-स्वाभाविकद्रवत्व-स्नेह-वेगवत्यः तासु च रूपं शुक्लमेव, रसो मधुर एव, स्पर्शः शीत एव ।

"तेजस्त्वाभिसम्बन्धात् तेजः" [प्र० भा० पृ० १५] । तच्च रूप-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-

---

१. **नित्याऽनित्या च** क्र। तुलना-"सा तु द्विविधा-नित्या चानित्या च । परमाणुलक्षणा नित्या, कार्यलक्षणा त्वनित्या ।"-**प्र० भा०** पृ० ४ ॥ २. यद्यपि 'पृथिवीत्वाभिसम्बन्धात् पृथिवी रूप-रस-गन्ध-स्पर्श-संख्या-परिणाम-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-गुरुत्व-द्रवत्व-संस्कारवती' [**प्र० भा०** पृ० ४-५] इति सर्वेषु वैशेषिकग्रन्थेषु 'वेग'शब्दस्थाने 'संस्कार' शब्दं पठित्वा चतुर्दशत्वं पृथिवीगुणानां वर्णितम्, तथापि संस्कारभेदेषु वेगस्यैव पृथिव्यां सम्भवाद् वेग एवात्र उपात्तो ग्रन्थकृता इति बोध्यम् । यद्यपि "संस्कारस्त्रिविधो वेगो भावना स्थितिस्थापकश्च" [**प्र० भा०** पृ० १३६] इति प्रशस्तपादभाष्ये तदनुसारिषु च सर्वेष्वपि ग्रन्थेषु संस्कारभेदतया स्थितिस्थापकः परिगणितोऽस्ति, सोऽपि च पृथिव्यां वर्तते, किन्तु वैशेषिकसूत्रेषु कुत्रचिदपि 'स्थितिस्थापक'सूचना-नुपलब्धेरस्मिन्नपि च सर्वसिद्धान्तप्रवेशकग्रन्थे कुत्रचिदपि तस्यानुल्लेखात् स्थिति-स्थापको नाभिमतोऽस्य ग्रन्थकृत इत्यपि भवेत् । वेगो भावना चेति भेदद्वयमेव स्वीकुरुतेऽयं ग्रन्थकार इति प्रतीयते । तथा च भावनाया आत्मन्येव वृत्तेः अवशिष्टस्य वेगाख्यसंस्कारस्यैव पृथिव्यां वृत्तेर्वेगवत्त्वमेवात्र पृथिव्या वर्णितमिति प्रतिभाति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैमित्तिक-द्रवत्व-वेगैरेकादशभिर्गुणैर्गुणवत् । तत्र रूपं शुक्लं भास्वरं च, स्पर्श उष्ण एवेति ॥

'वायुत्वाभिसम्बन्धाद् वायुः' [प्र० भा० पृ० १६] इति । स च अनुष्णाशीतस्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-वेगैर्नवभिर्गुणैर्गुणवान् [1] धृति-कम्पादिलिङ्गः शब्दलिङ्गो [2] गन्धादिवियुक्तोऽनुष्णाशीतस्पर्शलिङ्गश्चेति [3] ॥

'आकाशम्' इति पारिभाषिकी संज्ञा, एकत्वात् [4] तस्य । सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-शब्दैः षड्भिर्गुणैर्गुणवत् शब्दलिङ्गं चेति ॥

"कालः परापरव्यतिकर-यौगपद्या-[5]ऽयौगपद्य-चिर-क्षिप्र-[6]प्रत्ययलिङ्गः" [प्र० भा० पृ० २६] । स सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभागैः पञ्चभिर्गुणैर्गुणवान् ॥

"इत इदम्' इति यतस्तद् दिशो लिङ्गम्" [वै० सू० २।२।१२] । तद्यथा-इदमस्तात् पूर्वेण इदमुत्तरेणेति । सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभागैः पञ्चभिर्गुणैर्गुणवती, संज्ञा च [7] पारिभाषिकी चेति ॥

"आत्मत्वाभिसम्बन्धादात्मा" [प्र० भा०, पृ० ३०] । स च चतुर्दशभिर्गुणैर्गुणवान् । बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्नलिङ्ग-

---

१. °**अधृति** A B । तुलना-"विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः स्पर्श-शब्द-धृति-कम्पलिङ्गः तिर्यग्गमनस्वभावो मेघादिप्रेरणा-धारणादिसमर्थः ।"-**प्र० भा०** पृ. १८ ॥ २. **गन्धादियुक्तः** B । "क्षितावेव गन्धः"-**प्र० भा०** पृ० ११ ॥ ३. °**स्पर्शश्चेति** B ॥ ४. "आकाश-काल-दिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति-आकाशः कालो दिगिति ।"-**प्र० भा०** पृ० २३॥ ५. °**यौगपद्यचिर**° B ॥ ६. °**प्रत्ययः सङ्ख्या** A । तुलना-"कालः परापरव्यतिकर-यौगपद्या-ऽयौगपद्य-चिर-क्षिप्रप्रत्ययलिङ्गः ।"-**प्र० भा०** पृ० २६ ॥ ७. **परि**° B ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मा-ऽधर्म-संस्कार-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभागाश्चतुर्दश गुणाः ॥

मनस्त्वाभिसम्बन्धाद् मनः । तच्च क्रमज्ञानोत्पत्तिलिङ्गं[१] सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा[२]ऽ-परत्व-वेगैरष्टभिर्गुणैर्गुणवत् । **इति द्रव्यपदार्थः ॥**

अथ गुणाः- रूप-रस-गन्ध-स्पर्शा विशेषगुणाः[३], सङ्ख्या परिमाणानि पृथक्त्वं संयोग-विभागौ परत्वा-ऽपरत्वे इत्येते सामान्य-गुणाः, बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्मा-ऽधर्म-संस्कारा आत्म-गुणाः, गुरुत्वं पृथिव्युदकयोः, द्रवत्वं पृथिव्युदकाग्निषु, स्नेहोऽम्भस्येव,

---

१. **°त्पत्तिलिङ्गं मनः संख्या** B । "प्राणा-ऽपान-निमेषोन्मेष-जीवन-मनोगतिरिन्द्रियान्तरविकाराः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्चेत्यात्मलिङ्गानि"-**वै० सू०** ३।२।४। "आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः"-**प्र० भा०** पृ० ३४। "आत्मलिङ्गेति । प्राणादिसूत्रे बुद्धिः कण्ठरवेण नोक्ता इति चेत्, सूत्रेण विनास्याः प्रत्येयत्वात्, देवदत्तबुद्ध्या विष्णुमित्रस्येच्छाद्यदर्शनेनाऽऽत्मनीच्छादिकथनेन जनकतया तत्समानाधिकरणबुद्धेः सूचितत्वात् ।"-**प्र० भा० सेतु०** पृ० ३८९ ॥ २. **परत्वा-ऽपरत्वैः सप्तभिर्गुणैः** A । तुलना-"तस्य गुणाः संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-संस्काराः ।"-**प्र० भा०** पृ० ३६ । "संस्कारश्च मूर्तत्वादेव वेगाख्यः ॥"- **प्र० भा० व्योमवती** पृ० ४२७ । संख्या-परिणाम-पृथक्त्व-संयोग-विभाग-परत्वा-ऽपरत्व-संस्काराः मनःसमवेताः ॥१५४ ॥-**सप्तपदार्थी** [शिवादित्यरचिता] ॥ ३. रूप-रस-गन्ध-स्पर्श-स्नेह-सांसिद्धिकद्रवत्व-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्मा-ऽधर्म-भावना-शब्दा वैशेषिकगुणाः"-**प्र० भा०** पृ० ३९ । "रूप-स्पर्श-गन्ध-रस-स्नेहाः सांसिद्धिको द्रवः । बुद्ध्यादिनवशब्दाश्च वैशेषिकगुणाः स्मृताः ॥' इति प्राच्यैः परि-भाषितत्वात्"-**प्र० भा० सूक्ति** पृ० १६३ ।- इत्यादयः **प्रशस्तपाद-भाष्या**नुसारिवैशेषिकग्रन्थेषु बहव उल्लेखा दृश्यन्ते । वैशेषिकदर्शनसूत्रेषु तु नैतद्विषयकः कश्चनापि उल्लेखः । अतोऽत्र ग्रन्थकृता रूप-रस-गन्ध-स्पर्शानां चतुर्णामेव यद् विशेषगुणत्वं वर्णितं तत् **प्रशस्तपादभाष्य**परम्परातो विभिन्ना-मन्यामेव काञ्चिदपि परम्परामाश्रित्य कृतं भवेदिति सम्भाव्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेगाख्यः संस्कारो मूर्तद्रव्येष्वेव, आकाशगुणः शब्द इति । गुणत्वयोगाच्च गुणा[1] इति । तथा[2] चापान्तरालसामान्यानि- रूपत्वयोगाद् रूपम्, रसत्वादियोगाद् रसादयः । **इति गुणपदार्थः ।**

अथ कर्मपदार्थः-"उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि" [वै० सू० २।१।७] । कर्मत्वयोगात् कर्म । गमनग्रहणाच्च भ्रमण-स्यन्दन-नमनोन्नमनाद्यवरोधः[3] । **इति कर्मपदार्थः ।**

"सामान्यं द्विविधम्-परमपरं च[4]" [प्र० भा० पृ० १६४] । तत्र परं सत्ता द्रव्य-गुण-कर्मसु 'सत् सत्' इत्यनुवृत्तिप्रत्ययकारणत्वात्[5] सामान्यमेव । यत उक्तम्-"सदिति यतो द्रव्य-गुण-कर्मसु सा सत्ता" [वै० सू० १।१।७] । तथाऽपरं[6] द्रव्यत्व-गुणत्व-कर्मत्वादि । तत्र द्रव्यत्वं द्रव्येष्वेव । गुणत्वं गुणेष्वेव । कर्मत्वं कर्मस्वेव । **इति सामान्य-पदार्थः ॥**

"नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः" [प्र० भा० पृ० ४] । नित्यद्रव्याणि च चतुर्विधाः[7] परमाणवो मुक्तात्मानो मुक्तमनांसि च[8] । ते चात्यन्तव्या[9]वृत्तिबुद्धि[10]हेतुत्वाद् विशेषा एव । **इति विशेषपदार्थः ॥**

---

१. **गुण°** A ॥ २. **तथा अन्तराल°** B ॥ ३. **°द्यवरोधनम्** A । **°द्यवि रोधः** B ॥ तुलना-"अथ विशेषसंज्ञया किमर्थं गमनग्रहणं कृतमिति, न, भ्रमणाद्यवरोधार्थत्वात् । उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमण-पतन-स्यन्दनादीना-मवरोधार्थं गमनग्रहणं कृतमिति ।"-**प्र० भा०** पृ १५३ । "अनवरुद्धानाम्-असंगृहीतानाम्"-**प्र० भा० व्योमवती** पृ० ६६१ ॥ ४. **च** B नास्ति ॥ ५. **°द्यनुगतप्र°** B । "सा चाऽनुवृत्तेर्हेतुत्वात् सामान्यमेव"-**प्र० भा०** पृ० ४ ॥ ६. **अथा°** B ॥ ७. **चतुर्धा** A ॥ ८. **च** B नास्ति ॥ ९. **चांत्यत्वव्या°** B ॥ १०. **°त्तिप्रत्ययहे°** A । "ते च खलु अत्यन्तव्यावृत्तिबुद्धिहेतुत्वाद् विशेषा एव"-**प्र० भा०** (व्योमवतीसमेत) पृ० ५५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहेति[1] प्रत्ययहेतुः स समवायः" [प्र० भा० पृ० ५, १७१] । **इति समवायपदार्थः ।**

वैशेषिकसिद्धान्ते प्रमाणं वक्तव्यमिति चेत्, तदुच्यते- लैङ्गिक-प्रत्यक्षे द्वे एव[2] प्रमाणे, शेषप्रमाणानामत्रैवान्तर्भावात् ॥

तत्र लैङ्गिकं प्रमाणं दर्शयन्नाह- अस्येदं[3] कार्यम्, अस्येदं कारणं सम्बन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम् । अस्येदं कार्यम्, यथा विशिष्टो नदीपूरो वृष्टेः । अस्येदं कारणम्, यथा मेघोन्नतिर्वृष्टेरेव । सम्बन्धि द्विविधम्- संयोगि[4] समवायि चेति । तत्र संयोगि यथा- धूमोऽग्नेः । समवायि यथा-विषाणं गोः । एकार्थसमवायि द्विविधम्- कार्यं कार्यान्तरस्य, कारणं कारणान्तरस्य चेति । तत्र कार्यं कार्यान्तरस्य यथा- रूपं स्पर्शस्य । कारणं कारणान्तरस्य यथा- पाणिः पादस्य । विरोधि चतुर्विधम्- अभूतं भूतस्य, भूतमभूतस्य, अभूतमभूतस्य, भूतं भूतस्येति । तत्र अभूतं वर्षकर्म भूतस्य वाय्वभ्रसंयोगस्य लिङ्गम् । तथा

---

१. **इहेदंप्रत्यय°** A । "इहेदमिति यतः कार्यकारणयोः स समवायः" **वै० सू०** ७।२।२६। यद्यपि मुद्रिते प्रशस्तपादभाष्ये 'इहप्रत्ययहेतुः' इत्येव पाठ उपलभ्यते, किन्तु वैशेषिकसूत्रोपस्कारे "तदुक्तं **पदार्थप्रवेशाख्ये** प्रकरणे- अयुतसिद्धानामाधार्या-ऽऽधारभूतानां यः सम्बन्ध इहेति प्रत्ययहेतुः स समवायः [प्र० भा०] इति" (पृ० १९३) इति प्रशस्तपादभाष्यपाठ उद्धृतोऽस्तीति ध्येयम् ॥ २. यद्यपि "प्रत्यक्षानुमानागमाः प्रमाणानि" इति **प्रमाणमीमांसायां** (पृ० ७) **न्यायावतारवृत्तौ** (पृ० ९) **स्याद्वादरत्नाकरादिषु** (पृ० ३१३, १०४१) च वैशेषिकसम्मतत्वेनोक्तं तथापि तद् **व्योम**शिवादेरेव व्याख्यापरम्परानुसारेण ज्ञेयम् (दृश्यतां प्रशस्तपादभाष्यस्य व्योमवती व्याख्या० पृ० ५५४, ५८४, ५८७) । अन्येषां तु वैशेषिकाणां प्रमाणद्वित्वमेवाभिमतमिति ध्येयम् ॥ ३. "अस्येदं कार्यं कारणं सम्बन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम् ।"-**वै० सू०** ९।१८॥ ४. "संयोगि समवाय्येकार्थसमवायि विरोधि च । कार्यं कार्यान्तरस्य कारणं कारणान्तरस्य विरोध्यभूतं भूतस्य भूतमभूतस्य अभूतमभूतस्य भूतं भूतस्य ।"- **वै० सू०** ३।१।८॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भूतं वर्षकर्म अभूतस्य वाय्वभ्रसंयोगस्य लिङ्गम् । अभूतमभूतस्य यथा-अभूता श्यामता अभूतस्य घट्यग्निसंयोगस्य[1] लिङ्गम् । भूतं भूतस्य यथा-स्यन्दनकर्म सेतुभङ्गस्य[2] । तथाऽपरमपि लिङ्गमुत्प्रेक्ष्यमनया दिशा यथा,-जलप्रसादोऽगस्त्युदयस्य, तथा[3] चन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य चेत्यादि[4] । तच्च 'अस्येदम्' इत्यादिना सूचितम्, यतो लिङ्गोपलक्षणायेदं सूत्रम्, न नियमप्रतिपादनायेति ॥

आह-प्रत्यक्षलक्षणं किम् ? इति चेत्, तदाह-"आत्मे-न्द्रिय-मनोऽर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत्[5]" [वै० सू० ३।१।१३] । अस्य व्याख्या-आत्मा मनसा युज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति[6] । ततश्चतुष्टयसन्निकर्षाद्[7] घट-रूपादिज्ञानम्, त्रयसन्निकर्षाच्छब्दे[8], द्वयसन्निकर्षात्[9] सुखादिषु । एवं प्रत्यक्षमपि निर्दिष्टम् ॥

## इति[10] वैशेषिकमतं समाप्तम् ॥

---

१. **घटादि°** B ॥ २. **सेतुबंधस्य** A B । "स्रोतोभूतानामपां स्थलान्निम्नाभिसर्पणं यत् तद् द्रवत्वात् स्यन्दनम् । कथम् ? समन्ताद् रोधः-संयोगेनाऽवयविद्रवत्वं प्रतिबद्धम्..... । यदा तु मात्रया सेतुभेदः कृतो भवति तदा...सेतुसमीपस्थस्यावयवद्रवत्वस्य उत्तरोत्तरेषामवयवद्रवत्वानां प्रतिबन्धकाभावाद् वृत्तिलाभः ।....तत्र च कारणानां संयुक्तानां प्रतिबन्धेन गमने यदवयविनि कर्म उत्पद्यते तत् स्यन्दनाख्यमिति"-**प्र. भा०** पृ० १६०-१६१ ॥ ३. **यथा** A ॥ ४. **चेति** B । "शास्त्रे कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थम् ।.... लिङ्गं चन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च शरदि जलप्रसादोऽगस्त्योदयस्येत्येवमादि । तत् सर्वम् 'अस्येदम्' इति सम्बन्धमात्रवचनात् सिद्धम् ।"-**प्र० भा०** पृ० १०४ । "इत्येवमादि' इति 'आदि' पदेन उदयादिरस्तादेर्लिङ्गमित्यूह्यम्" ।-**प्र० भा० व्योमवती** पृ० ५७३ ॥ ५. **तत्प्रत्यक्षम्** B ॥ ६. **°मर्थेन** A ॥ ७. आत्म-मन-इन्द्रिया-ऽर्थानां चतुर्णां संयोगात् । ८. आत्म-मनः-श्रोत्राणां त्रयाणां संयोगात् ॥ ९. आत्म-मनसोर्द्वयोः संयोगात् ॥ १०. **वैशेषिकतन्त्रः समाप्तः** A ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# [ जैनदर्शनम् ]

अथ जैनसिद्धान्तानुसारेण प्रमाण-प्रमेयस्वरूपावधारणायेदमुपदिश्यते । आह-यद्येवम्, ब्रूहि [1]किं तत् प्रमाणं प्रमेयं च ? इति । तत्र प्रमेयं "जीवा-ऽजीवा-[2]ऽऽस्रव-बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम्" [तत्त्वार्थसूत्र० १।४] । तत्र सुख-दुःख-ज्ञानादिपरिणामलक्षणो जीवः । विपरीतस्त्वजीवः । "मिथ्यादर्शना-ऽविरति-प्रमाद-कषाय-योगा बन्धहेतवः, काय-वाङ्-मनःकर्म योगः, स आश्रवः, शुभः पुण्यस्य" [तत्त्वार्थसूत्र ८।१, ६।१, ६।२, ६।३] [3]विपरीतः पापस्य । आश्रवकार्यं बन्धः । आश्रवविपरीतः संवरः । संवरफलं निर्जरा ।

[4]अथ प्रमाणं प्रत्यक्षमनुमानमागमश्चेति[5] । तत्र प्रत्यक्षम्-इन्द्रियमनोनिमित्तं विज्ञानं निश्चितमव्यभिचारीति[6] लौकिकं व्यवहारतः प्रत्यक्षम्, अवध्यादि निश्चयतः । [7]अन्यथाऽनुपपन्नाल्लिङ्गाल्लिङ्गिनि ज्ञानमनुमानम्, यथा धूमादग्निज्ञानम् । 'तपसः स्वर्गो भवति' इत्यागमः[8] प्रमाणम्, निश्चिता-ऽविपरीतप्रत्ययोत्पादकत्वात्, चक्षुरादिवत् ।

**इति जैनसिद्धान्तप्रवेशकः समाप्तः[9] ॥**

---

१. **किमेतत्** A ॥ २. **°ऽऽश्रव-बन्ध-संवर-निर्जरा°** B ॥ ३. "अशुभः पापस्य"-**तत्त्वार्थसूत्र** ६ ।४॥ ४. **तत्र प्रमाणं** B ॥ ५. यद्यपि "प्रमाणं द्विधा-प्रत्यक्षं परोक्षं च" [प्र० मी० १।१।९, १०] "विशदः प्रत्यक्षम्" [प्र० मी० १।१।१३] "अविशदः परोक्षम्, स्मृतिप्रत्यभिज्ञानोहानु-मानागमास्तद्विधयः" [प्र० मी० १।२।१,२] इति प्रमाणमीमांसादिश्वेताम्बरीयग्रन्थेषु प्रमाणविभाग उपलभ्यते, किन्तु स **अकलङ्कोपज्ञ** इति प्रतीयते । श्वेताम्बराणां प्राचीनतमेषु ग्रन्थेषु तु त्रिविधत्वं प्रमाणानां बहुत्र वर्णितं दृश्यते । दृश्यतां **न्यायावतारः (सिद्धसेनदिवाकरप्रणीतः)** कारिका ४,५,६,७ । **न्यायावतार-वार्तिकवृत्तिः** पृ० ७७, ९९ । **अनेकान्तजयपताकाटीका** पृ० १४२, २१५ ॥ ६. **°चारि लौकिकं** A ॥ ७. "साध्याविनाभुवो लिङ्गात् साध्यनिश्चायकं स्मृतम् । अनुमानं तदभ्रान्तं प्रमाणत्वात् समक्षवत् ॥४॥" -**न्यायावतारः** ॥ ८. **°इत्यागमं** B ॥ ९. **समाप्तम्** B नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# [ साङ्ख्यदर्शनम् ]

अथ साङ्ख्यमतप्रदर्शनायेदमुपदिश्यते[1] । तत्र हि[2] ↑ प्रकृतिः पुरुषः तत्संयोगश्च ↑ । सत्त्वरजस्तमसां[3] साम्यावस्था प्रकृतिः । ↑ तस्या[4] एव वैषम्यावस्था परिणामः । यथा ↑ ★तस्याः[5] प्रकृतेर्महानुत्पद्यते, महतोऽहङ्कारः★ ततश्चाहङ्कारादेकादशेन्द्रियाणि-पञ्च[6] बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, अपरं[7] मनः । तथा[8] तत एवाहङ्कारात् तमोबहुलात् पञ्च तन्मात्राणि, तद्यथा-शब्दतन्मात्रम्[9], स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्र-मिति । एतेभ्यश्च यथाक्रमेण भूतानि आकाशवाय्वग्न्युदकभूमयः भूतसमुदायश्च शरीर-वृक्षादयः ।

सत्त्वादिलक्षणं वक्तव्यमिति चेत्; तदुच्यते-प्रसाद[10]-लाघव-

---

१. °मप° A ॥ २. ↑ ↑ एतदन्तर्गतः पाठः B नास्ति । "ततश्च यदृच्छामात्रत्वादङ्गीकृतपुरुषार्थयत्नार्थहानिः ।....। तस्य च हानौ प्रधान-पुरुष-संयोगत्रित्वपरिज्ञानार्थशास्त्रयत्ना[र्थ]हानिरपि"-**नयचक्रवृत्तिः** पृ० १४ ॥ ३. **°तमःसाम्या°** B । "एतेषां या समावस्था सा प्रकृतिः किलोच्यते ।"-**षड्दर्शनसमुच्चय** ३६ A ॥ ४. ↑ ↑ एतदन्तर्गतः पाठः B नास्ति ॥ **५.** ★★एतत्स्थाने A प्रतावित्थं पाठः- **महान् अहङ्कारः** । तुलना— "प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥२२॥"—**सांख्यकारिका** ॥ ६. **पञ्च** B नास्ति ॥ ७. **च एकादशं मनः** A ॥ ८. **तथैकादशाद् गणात् तमो°** B । तुलना-"अभिमानोऽहंकार-स्तस्माद् द्विविधः प्रवर्तते सर्गः । ऐन्द्रिय एकादशकस्तन्मात्रकपञ्चकश्चैव ॥२४॥ सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात् । भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥२५॥"-**सांख्यका°** । ९. **शब्द रूप रस गन्ध स्पर्श । एतेभ्यश्च तथा क्रमेण भूतानि तथा पृथिव्याप्तेजोवाय्वाकाशादीनि भूतसमु°** B । तुलना-"तन्मात्राणि शब्द-स्पर्श-रूप-रस-गन्धाख्यानि"-**सांख्यका० माठरवृत्ति पृ० १० ॥ १०. प्रकाश[प्रसा]द°** B । "प्रीत्यप्रीति-विषादात्मकाः प्रकाश-प्रवृत्ति-नियमार्थाः ॥१२॥"-**सांख्यका०** ॥

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

प्रसवाऽभिष्वङ्ग-प्रीतयः[१] कार्यं सत्त्वस्य, शोष-ताप-भेद-स्तम्भोद्वेगा-[२]ऽपद्वेषाः कार्यं रजसः, आवरण-सादन-बीभत्स-दैन्य-गौरवाणि तमसः कार्यम्[३] ।

"सत्त्वं[४] लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।

गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥" [साङ्ख्यका०-१३] एवं तावत् प्रकृतिः स्थूल-सूक्ष्मरूपेण व्याख्याता ॥

अथ पुरुषः किंस्वरूपः[५] ? चैतन्यं पुरुषस्य स्वरूपम्[६] । प्रकृतिपुरुषयोश्च उपभोगार्थः सम्बन्धः[७] संयोगः पङ्ग्वन्धयोरिव[८] । उपभोगश्च[९] शब्दाद्युपलम्भो गुणपुरुषान्तरोपलम्भश्च । आह-किमेकः

---

१. °**धर्मप्रीत्यादयः** A । एतद्विषयकेषु तत्तद्ग्रन्थान्तर्गतभागेषु प्रायः सर्वत्र 'धर्म' शब्दस्थाने 'उद्धर्ष' पाठ एवोपलभ्यते । यदि तु यथाश्रुत'धर्म'शब्दपाठे एव निर्बन्धः तर्हि 'अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् । सात्त्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम् ॥२३॥' इति सांख्यकारिकाप्रतिपादितं धर्मं गृहीत्वा संगमनीयम् । २. °**गप्रद्वेषाः** B । ३. तुलना-"सुखानां शब्द-स्पर्श-रूप-रस-गन्धानां प्रसादलाघवप्रसवाऽभिष्वङ्गोद्धर्षप्रीतयः कार्यम् । दुःखानां शोष-ताप-भेदा(दो)पस्तम्भोद्वेगाऽपद्वेषाः । मूढानां वरण-सदना-ऽपध्वंसन-बैभत्स्य-दैन्य-गौरवाणीति"-**नयचक्रवृत्ति** पृ० १२ । "प्रसाद-लाघवा-ऽभिष्वङ्गोद्धर्षप्रीतयः सत्त्वस्य कार्यम् ।...ताप-शोष-भेद-स्तम्भोद्वेगापद्वेगा(षा) रजसः कार्यम् ।... दैन्या-ऽऽवरण-सादना-ऽ[प]ध्वंस-बीभत्स-गौरवाणि तमसः कार्यम्"-**तत्त्वसं० पं०** पृ० २१ । **न्यायकुमुदचन्द्र** पृ० ३५० ॥ ४. नेयमार्या B प्रतौ ॥ ५. **किंरूपः** A ॥ ६. **स्वं रूपम्** A ॥ "वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारो दृश्यते । तद्यथा-चैतन्यं पुरुषस्य स्वरूपमिति । यदा चितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते ?"-**पातञ्जलदर्शनयोगभाष्य** १।९॥ ७. **सम्बन्धः** A नास्ति ॥ ८. "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥२१॥"-**सांख्यका०** ॥ ९. "सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥३७॥"-**साङ्ख्यका०** । "तथा चाहुः-उपभोगस्य शब्दाद्युपलब्धिरादिर्गुण-पुरुषान्तरोपलब्धिरन्तः ।"-**सांख्यका० युक्तिदीपिका** पृ० १३९ । "प्रधानस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषोऽनेको वा ? अनेक इत्याह । का पुनरत्र युक्तिः ? जन्म-मरण-करणानां [1]नियमदर्शनाद् धर्मादिषु प्रवृत्ति[2]नानात्वाच्चानेकः [3]पुरुषः, स आत्मोच्यते इति ॥

अथ प्रमाणं वक्तव्यम् । तदुच्यते-प्रत्यक्षमनुमानमागमश्चेति । तत्र प्रत्यक्षम्-"[4]श्रोत्रादिवृत्तिः प्रत्यक्षम्" [ ] श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणानां मनसाधिष्ठितानां शब्दादिविषयग्रहणे [5]वर्तमाना वृत्तिः

---

पुरुषार्था प्रवृत्तिः । स च पुरुषार्थो द्विविधः-शब्दाद्युपलब्धिरादिर्गुण-पुरुषान्तरोपलब्धिरन्तश्च"-**माठरवृ०** पृ० ७९॥

१. **°नियमादर्श°** A । **नियतदर्श°** B । "जन्म-मरण-करणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥१८॥ जन्मनियमात् पश्यामो बहवः पुरुषाः, यथैकस्मिन्नधिष्ठाने बहवः स्त्रियो गर्भिण्यः तत्र काश्चित् प्रसूताः काश्चित् प्रसविष्यन्ति । यद्येकः पुरुषः स्यात् एकस्यां प्रसूतायां सर्वाः प्रसवेरन् । अतः पश्यामो बहवः पुरुषाः ।... । यद्येकः पुरुषः स्यात् एकस्मिन् जीवति सर्वे जीवेरन्, एकस्मिन् मृते सर्वे म्रियेरन्, तस्मान्मरणनियमात् पश्यामो बहवः पुरुषाः । किञ्च, बधिराः, केचिन्मूकाः, केचिदमूकाः ।...। अतः कारणान्नियमात् पश्यामो बहवः पुरुषाः इति । अयुगपत्प्रवृत्ति(त्ते)श्च, इह लोके नानाविधा प्रवृत्तिर्दृष्टा, तद्यथा एको धर्मे, एकः कामे, एकोऽर्थे, अन्यः मोक्षे । अतः पश्यामो बहवः पुरुषा इति । इतश्च बहवः पुरुषाः त्रैगुण्यविपर्ययार्थम्, एकस्य कस्यचित् ब्राह्मणस्य त्रयः पुत्रा एकेनोत्पन्नाः तुल्यगोत्रस्वाध्यायाः । तत्र एकः सात्त्विकः, एकः राजसः, एकस्तामसः । यद्येकः पुरुषः स्यादेकस्मिन् सात्त्विके सर्वे सात्त्विका स्युः ।....। न चैकं भवति । अतः पश्यामो बहवः पुरुषा इति । त्रैगुण्यविपर्ययाद् "वासुदेवदर्शनात् मणिसूत्रदर्शनाच्च एकः पुरुषः" इति तेन (तन्न) । एवं तावत् पञ्चभिर्हेतुभिः पुरुषबहुत्वं सिद्धमित्याह ॥"-[जेसलमेरस्थपुस्तकसङ्ग्रहान्तर्गता] **सांख्यकारिकावृत्तिः** A । पृ० ३२ ॥ २. **°नानात्वादनेकः** B ॥ ३. **पुरुष इति** A ॥ ४. "**वार्षगण्यस्यापि** लक्षणमयुक्तमित्याह-श्रोत्रादिवृत्तिरिति ।"-**न्या० वा० ता०** पृ० १३२ । "श्रोत्रादिवृत्तिरिति वार्षगणाः" -**सांख्यका० युक्तिदी०** पृ० ३९ । "श्रोत्रादिवृत्तिः प्रत्यक्षमनुमानमनुस्मृतिः ।"-**सिद्ध० द्वा०** १३।५॥ ५. **वर्तनाद् वृत्तिः** B । तुलना-"तथा श्रोत्रादिवृत्तिः प्रत्यक्षम्, श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयाकारपरिणामः प्र[1]त्यक्षं प्रमाणमिति [2]उच्यते ॥

[3]अथानुमानम्-

"[4]सम्बन्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम् ।" [ ]

सम्बन्धादविनाभावलक्षणेन सम्बन्धेन लिङ्गात्, यथा धूमादग्निरत्रेति ॥

"आप्तोपदेशः शब्दः" [न्या० सू० १।७] । [5]यो यत्राभियुक्तः

---

मनसाधिष्ठिता वृत्तिः शब्द-स्पर्श-रस-रूप-गन्धेषु यथाक्रमं ग्रहणे वर्तमाना प्रमाणं प्रत्यक्षमिति ।"-**नयचक्रवृत्ति** पृ० १०७॥

१. **°त्यक्षप्र°** B ॥ २. **उच्यते** A नास्ति ॥ ३. **तथा°** A ॥ ४. नेदमार्यार्धं B प्रतौ । "एतेन सम्बन्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम्, इति लक्षणं प्रत्युक्तम् ।" -**न्यायवा०** १।१।५, पृ० १६७ । "सम्प्रति साङ्ख्यीयमनुमानलक्षणं दूषयति- एतेनेति । सम्बन्धोऽविनाभावः साधनस्य साध्येन, तस्मात् प्रत्यक्षाद्... एकस्माद्... शेषस्य अनुमेयस्य सिद्धिः ।....सम्बन्ध्यत इति व्युत्पत्त्या सम्बन्धो लिङ्गम्, तेनाविनाभूताद्धेतोः प्रत्यक्षादनुमेयसिद्धिरिति"-**न्यायवा० ता०** पृ० १६७ । **नयचक्रवृत्तौ तु** 'सम्बन्धाद्' 'सम्बद्धाद् इत्युभयविधोऽपि पाठो दृश्यते-"सम्बद्धैकदेश इति वा पाठः । यथोक्तम्-'**सम्बद्धा**देकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम् ।' सम्बद्धानां भावानां स्वस्वाभिभावेन वा इत्यादिना सप्तविधेन कश्चिदर्थः कस्यचिदिन्द्रियस्य प्रत्यक्षो भवति तस्मादिदानीमिन्द्रियप्रत्यक्षाच्छेषस्याप्रत्यक्षस्यार्थस्य या सिद्धिरनुमानं तत्, यथा धूमदर्शनादग्निरिति ज्ञानम् ।"-**नयचक्रवृत्ति** पृ० २४० ।

"सम्बन्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानम् ।...यथायोगं स्व-स्वामि-निमित्त-नैमित्तिकादिषु तेन तेन सम्बन्धेन सम्बन्धात् प्रत्यक्षादिति प्रत्यक्षस्य धर्मादुपलब्धात् प्रसिद्धादिति यावत् । तत्रैको यः प्रत्यक्षः स पक्षधर्मः शेषोऽनुमेयः, ....प्रत्यक्षवत् प्रत्यक्षः प्रसिद्धः, तस्मात् प्रसिद्धत्वात् सम्बन्धी पक्षधर्मोऽश्वः स्वम्, तस्य पक्षधर्मस्य सम्बन्धात् प्रागुपलब्धादनुस्मर्यमाणाच्छेषेण शेषस्य चैत्रस्य सिद्धिरिति ।"-**नयचक्रवृत्ति** पृ० ६८८ ॥ ५. "प्रत्यक्षादीन्यपि च तन्त्रान्तरेषूपदिश्यन्ते-'श्रोत्रादिवृत्तिः प्रत्यक्षम् । सम्बन्धादेकस्माच्छेषसिद्धिरनुमानम् । यो यत्राभियुक्तः कर्मणि चादुष्टः स तत्राप्तः, तस्योपदेश आप्तवचनम्' इति"-**सांख्यका० युक्तिदी०** पृ० ४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणि चादुष्टः स तत्राप्तः । तेन य उपदेशः क्रियते तद्यथा 'स्वर्गेऽप्सरसः, उत्तराः कुरवः' स आप्तोपदेशः । एवमेतानि त्रीण्येव प्रमाणानि शेषप्रमाणानामत्रैवान्तर्भावात्[1] ।

इति साङ्ख्यसिद्धान्तः[2] समाप्तः ।

## [ बौद्धदर्शनम् ]

अथ बौद्धमतप्रदर्शनायेदमपदिश्यते[3][4] । तत्र हि पदार्था द्वादशाऽऽ-यतनानि । तद्यथा-चक्षुरिन्द्रियायतनं रसेन्द्रियायतनं घ्राण-स्पर्श-श्रवण[5]-मनआयतनं रूपायतनं रसायतनं गन्धायतनं स्पर्शायतनं शब्दायतनं धर्मायतनम् । धर्माश्च[6] सुखादयः ।

आह-कः पुनरेषां परिच्छेदहेतुः ? प्रमाणम् । *तद् द्विधा- "प्रत्यक्षमनुमानं च । तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्" [न्यायबिन्दु १।३, ४] कल्पना नाम-जात्यादियोजना[7] । तत्र नामकल्पना डित्थ इति। जातिकल्पना गौरिति । गुणकल्पना शुक्ल इति । क्रियाकल्पना पाचकः पाठक इति । द्रव्यकल्पना दण्डी विषाणीति । अनया कल्पनया रहितं प्रत्यक्षं प्रमाणमित्युच्यते ।

अथानुमानम्- त्रिरूपाल्लिङ्गाल्लिङ्गिनि ज्ञानमनुमानम् । रूपत्रयं च

---

१. **शेषाणाम॰** A ॥ २. **सांख्यमतं समाप्तम्** B ॥ ३. **बुद्ध॰** A ॥ ४. **॰नायैवमाह तत्र** B ॥ ५. "पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् । धर्मायतनमेतानि द्वादशायतनानि च ॥८॥"-**षड्द० स०** । एतान्येव द्वादशायतनानि **अभिधर्मकोशेऽपि** ॥ ६. "धर्माः सुख-दुःखादयः, तेषामायतनं गृहं शरीरमित्यर्थः"-**षड्द० स० बृहद्वृत्ति** पृ० १३ A ॥ ★ **तच्च** B ॥ ७. **॰जात्यादिकल्पना** B । "अपरे तु मन्यन्ते-प्रत्यक्षं कल्पनापोढमिति । अथ केयं कल्पना ? नामजात्यादियोजनेति ।"-**न्यायवा०** १।१।४। पृ० १३० । विस्तरार्थं दृश्यताम्- **प्र० समु०** १।३। **तत्त्वसं० पं०** पृ० ३६९ । **न्यायवा० ता०** पृ० १३० । **नयचक्रवृत्ति** पृ० ५९-६० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षे चासत्त्वमेवेति[1]। अस्मात् त्रिरूपाल्लिङ्गा[2]-न्निश्चिताल्लिङ्गिनि साध्यधर्मविशिष्टे[3] धर्मिणि ज्ञानमनुमानम्। इत्येवं द्वे एव प्रमाणे, शेषप्रमाणानामत्रैवान्तर्भावात्।

इति सुगतसिद्धान्तः[4] समाप्तः ॥

## [ मीमांसकदर्शनम् ]

मीमांसकसिद्धान्ते[5] वेदपाठानन्तरं धर्मजिज्ञासा कर्तव्या। यतश्चैवं ततस्तस्य[6] निमित्तपरीक्षा। निमित्तं च[7] चोदना। यत[8] उक्तम्-"चोदनालक्षणोऽर्थो[9] धर्मः" [जै० सू० १।१।२]। चोदना च क्रियायाः प्रवर्तकं वचनमाहुः[10], यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यादि। तेन धर्मो लक्ष्यते, न पुनः प्रत्यक्षादिना।

आह-कथं प्रत्यक्षमनिमित्तम्? यतस्तदेवंविधम्-"सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं[11] विद्यमानोपलम्भकत्वात्[12]" [जै० सू० १।१।४]। तथा अनुमानमप्यनिमित्तम्, प्रत्यक्षपूर्वकत्वात् तस्येति। तथा उपमानमप्यनिमित्तमेव।

यतस्तस्य गो-गवयसादृश्यग्रहणे सति गौरेव[13] प्रमेयः। तथा अर्थापत्तिरपि, सा च द्विधा-श्रवणाद् दर्शनाच्च। श्रवणाद् यथा पीनो

---

१. °**सत्त्वमेवेत्येतस्मात्** B ॥ २. °**ङ्गाज्ज्ञानन्निश्चितालिङ्गिनि** A ॥ °**ङ्गान्निश्चितं लिङ्गिनि** B ॥ ३. **साध्य°** B नास्ति ॥ ४. **सुगतमतं समाप्तम्** B ॥ ५. °**राद्धान्ते** B ॥ ६. "तस्य निमित्तपरीष्टिः-" **जै० सू०** १।१।३ ॥ ७. **च** B नास्ति ॥ ८. **यतश्चोक्तम्** B ॥ ९. °**क्षणो धर्मः** A ॥ १०. "चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः"-**शाबरभाष्य** १।१।२॥ ११. °**मित्तं च विद्य°** A ॥ १२. °**लम्भत्वात्** A । "**लम्भनत्वात्**" इति मुद्रिते जैमिनिसूत्रे ॥ १३. **गौरिव गवयः प्रमेयः** B । अत्रेदं ध्येयम् । 'गौरिव गवयः' इत्युपमानं नैयायिकानां शोभते । मीमांसकग्रन्थेषु 'एतेन (गवयेन) सदृशो गौः' इत्येव उपमानस्वरूपं वर्णितं सर्वत्र **शाबरभाष्य-मीमांसाश्लोकवार्तिकादिषु** । एवमेव **चानूदितमन्यैरपि-"जैमिनीयास्तु** अन्यथोपमानस्वरूपं वर्णयन्ति । यदा श्रुतातिदेश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवदत्तो दिवा न भुङ्क्ते, अर्थादापन्नम्-रात्रौ भुङ्क्ते । अस्याश्च[1] रात्रिभोजन[2]-वाक्यमेव प्रमेयमिति[3] । दर्शनाद् यथा भस्मादिविकार-मुपलभ्य दाहशक्तिर्वह्नेः[4] प्रमीयते । तथा अपराण्यपि उदाहरणानि शास्त्रादुत्प्रेक्ष्य वक्तव्यानि । अभावोऽप्यनिमित्तम्, अभावविषयत्वात् । तस्माच्चोदनालक्षण एव धर्मो नान्यलक्षण इति स्थितम् । तथा वर्णानामेव वाचकत्वम्-अर्थप्रतिपत्तिहेतुत्वम् । तच्च बाह्य एवार्थे, नान्यत्र । यत उक्तम्-"गकारौकारविसर्जनीया इति[5] भगवानुपवर्षः"

---

वाक्यस्य वने गवयपिण्डदर्शनानन्तरं नगरं गतं गोपिण्डमनुस्मरतः 'एतेन सदृशो गौः' इति ज्ञानं तदुपमानम् । तस्य विषयः सम्प्रत्यवगम्यमानगवयसादृश्यविशिष्टः परोक्षो गौः तद्वृत्ति वा गवयसादृश्यम्"-**न्यायमं०** पृ० १३२ । यद्यपि **न्यायावतारवृत्तौ** (पृ० १९) 'अयं तेन सदृशोऽनयोर्वा सादृश्यम्' इति वर्णितमुपमानस्वरूपम्, तत्र साम्मत्याय च संवादितः "तस्माद् यद् दृश्यते तत् स्यात् सादृश्येन समन्वितम् । प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥" इति श्लोकः, किन्तु मीमांसकानामेवेदं मतमिति आहत्य वक्तुं न पार्यते, यतोऽयं श्लोकः **मीमांसश्लोकवार्तिके** "तस्माद् यत् स्मर्यते तत् स्यात्..." ॥ [मी० श्लो० वा० उपमान० ३७ A] इति पाठभेदेनैवोपलभ्यते तथैव च व्याख्यातोऽपि व्याख्यातृभिः, यत्तु "प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धस्य साधनम् ॥७४॥" इत्यभिहितं **षड्दर्शनसमुच्चये हरिभद्रसूरिपादैः** तत्तु केनचिदप्यभिप्रायविशेषेण संगमनीयम् । यतस्त एव **हरिभद्रसूरिपादाः शास्त्रवार्तासमुच्चयस्वोपज्ञवृत्तावित्थमभिदधिरे**- "नैवोपमानेनापि गम्यते सर्वज्ञः, तस्य सादृश्यविषयत्वात् 'अनेन दृश्यमानेन पदार्थेन सदृशस्तदीयो गौः' इति प्रवृत्तेः ।" पृ० ८० A ॥

१. **अत्र रात्रि°** A ॥ २. **°जनमेव** B । "पीनो दिवा न भुङ्क्ते चेत्येव-मादिवचःश्रुतौ । रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते ॥५१॥ तामर्थविषयां केचिदपरे शब्दगोचराम् । कल्पयन्ति... ॥५२॥"इत्युक्त्वा अन्ते वाक्यविषयत्वं प्रसाधितं मीमांसाश्लोकवार्तिके **कुमारिलेन** । "पीनत्वे सति दिवा भोजनप्रतिषेधस्य आत्मलाभो रात्रिवाक्यं नोपपद्यते इति श्रुतार्थापत्तेः प्रमाणविषयत्वेन दृष्टार्थापत्तेर्वैलक्षण्यम्" ।-**मी० श्लो० वा० भट्टोम्बेकवृत्ति** पृ० ४०४ ॥ ३. **प्रमेयम्** B ॥ ४. **°र्वह्नौ** A । "तत्र प्रत्यक्षतो ज्ञाताद्दाहाद्दहनशक्तता । वह्नेः...॥३०॥"-**मी० श्लो० वा० अर्था०** ॥ ५. **इति गवानुवेशः** A । **इति ताल्वाद्यनुकर्ष** B । "अथ गौः इत्यत्र कः शब्दः ? गकारौकारविसर्जनीया इति भगवानुपवर्षः ।"-**शाबरभाष्य** ॥

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

[शाबरभाष्य, १।१।५. पृ० ४५] । वायोश्च वक्त्रा प्रेरितस्य श्रोतुः श्रोत्रदेशं प्राप्तस्य ये संयोगविभागास्तेऽभिव्यञ्जका गकारादिवर्णानाम् । ते चाभिव्यक्ता[1] एव वाचकाः, नान्यथा । नित्यश्च[2] शब्दार्थयोः सम्बन्धः । न च मीमांसकानां वर्णव्यतिरिक्ते पद-वाक्ये स्तः, तेष्वेव पद-वाक्योपचारात् ॥

इति मीमांसक[3]सिद्धान्तः समाप्तः ॥

## [ लोकायतिकमतम् ]

बृहस्पतिमतानुसारिविहितप्रमाणप्रमेयस्वरूप[4]निरूपणाय समासेनेदमाह । तत्र[5] च प्रमेयनिरूपणायाह-"पृथिव्यापस्तेजो[6] वायुरिति तत्त्वानि" [बृह० सू०] । आह-तत्त्वान्तरमप्यस्ति शरीरेन्द्रियादि[7] । न तत्त्वान्तरम्, यतः "तत्समुदाये शरीरेन्द्रियविषयसंज्ञा" [बृह० सू०] । शरीरं भूतसमुदायः तथेन्द्रियाणि विषयाश्चेति । तस्माच्चत्वार्येव तत्त्वानि । ज्ञानं तत्त्वान्तरमिति चेत्, तदपि न, यत आह-"तेभ्यश्चैतन्यम्[8]" [बृह० सू०], तद्धर्म एवेत्यर्थः, मद्याङ्गानां मदशक्तिवत् । ननु चात्मा

---

१. **चाभिव्यञ्जका एव न वाचका** B । "अभिघातेन हि प्रेरिता वायवः स्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान् संयोगविभागानुत्पादयन्ति यावद्वेगमभिप्रतिष्ठन्ते ।"-**शाबरभाष्य** १।१।१३ ॥ २. **नित्यः शब्दा°** A ॥ ३. **°कमतस्य दिक्प्रदर्शनमिति** B ॥ ४. **°रूपप्रदर्शनाय** B ॥ ५. **तत्र प्रमेयनिरूपणार्थमाह** B ॥ ६. "ननु यद्युपप्लवस्तत्त्वानां किमापा... अथातस्तत्त्वं व्याख्यास्यामः । पृथिव्यापस्तेजो वायुरिति तत्त्वानि । तत्समुदायेषु शरीरेन्द्रियविषयसंज्ञा"-**तत्त्वोप० सिंह** पृ० १। "पृथिव्यापस्तेजो वायुरिति तत्त्वानि । तत्समुदायेषु शरीरेन्द्रियविषयसंज्ञा"-**धर्मसं० वृ०** पृ० २५ A ७२ B । "यदुवाच **वाचस्पतिः**-'पृथिव्यापस्तेजो वायुरिति तत्त्वानि, तत्समुदाये शरीरेन्द्रियविषयसंज्ञाः, तेभ्यश्चैतन्यम्' इति"-**षड्द० बृ०** पृ० १२४ । **स्या० र०** पृ० १०८५ ॥ ७. **°दिकं तत्त्वान्तरं यतस्तन्न तत्समु°** B ॥ ८. "अत्र...लोकायतिकाः... 'तेभ्यश्चैतन्यम्, मदशक्तिवद् विज्ञानम्, चैतन्यविशिष्टः कायः पुरुषः' इति चाहुः ।" -**ब्रह्मसूत्र-शांकरभाष्य** ३।३।५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वान्तरम्, तदप्यसम्बद्धमेव, यत आह **सूत्रकारः**-"[1]जलबुद्बुद-वज्जीवाः" [बृह० सू०], तथा "[2]चैतन्यविशिष्टः कायः पुरुषः" [बृह० सू०] । ननु च पुरुषार्थः कश्चित् तत्त्वान्तरं भविष्यति । तन्निवृत्त्यर्थमाह-"प्रवृत्तिनिवृत्तिसा[3]ध्या प्रीतिः पुरुषार्थः" [बृह० सू०] स च "काम एव" [बृह० सू०], नान्यो मोक्षादिः । ननु चान्य एव कश्चिद् बुद्ध्याधारः पुरुषो भविष्यति । दृष्टहान्यदृष्टकल्पनासम्भवा-न्नान्यः । तस्मात् स्थितमेतत्-'चत्वार्येव तत्त्वा[4]नि' ।

अथ प्रमाणम् । तस्य सामान्यलक्षणम्-अनधिगतार्थपरिच्छित्तिः प्रमाणम् । उपायो वा सन्निकर्षेन्द्रियार्था[5]दि । "सन्निहिततदर्थे यथार्थविज्ञानं [6]प्रत्यक्षम्" [बृह० सू०] । प्रत्यक्षस्येदं लक्षणम् । तन्मते "[7]प्रत्यक्षमेवैकं प्रमाणम्" [बृह० सू०] । ननु चो[8]क्तम्-"असन्निहितार्थ-मनुमानम्" [बृह० सू०] । तच्च परमतानुसारेण न स्वमतापेक्षयेति स्थितमिति लोकायतानां संक्षेपतः प्रमाणप्रमेय[9]स्वरूपम् ।

**★[10]इति लोकायतराद्धान्तः समाप्तः ।**

**सर्वसिद्धान्तप्रवेशकः समाप्तः ।**

**नैयायिक-वैशेषिक-जैन-साङ्ख्य-बौद्ध-मीमांसक-लोकायतिकमतानि सङ्क्षेपतः समाप्तानि ।**

---

१. **धर्मसं० वृ०** पृ० २७ A । **षड्द० बृ०** ॥ २. **शास्त्रवा० स्वो०** पृ० ५ B । **षड्द० बृ०** ॥ ३. "साध्या वृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने । निरर्था सा मता तेषां धर्मः कामात् परो न हि ॥८६॥"-**षड्द०** ॥ ४. "तत्त्वसंख्या न युज्यते चत्वार्येव तत्त्वानि इति ।"-**शास्त्रवा० स्वो०** पृ० ८ A । "चत्वार्येव पृथिव्यादीनि तत्त्वानि' इति तत्त्वनियमसंख्याव्याघातप्रसङ्गः ।"-**धर्मसं० वृ०** पृ० ३७ B ॥ ५. °**यदि सन्निहितोर्थः यथा विज्ञानं** A ॥ ६. **प्रत्यक्षम्** B मध्ये नास्ति ॥ ७. "प्रत्यक्षमेवैकं प्रमाणम्' इति वचनात्"-**धर्मसं० वृ०** पृ० ६५ B । "प्रत्यक्षमेवैकं प्रमाणं नान्यत्' इति वचनात्"-**धर्मसं० वृ०** पृ० ३७ B -६३ A ॥ ८. **चोक्तं परार्थमनुमानम्** A ॥ ९. °**स्वरूपं समाप्तमिति** B ॥ **१२.** ★★ एतच्चिह्नान्तर्गतः पाठः B मध्ये नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री गुरुस्तुतिः

॥ श्रीसद्गुरुदेवाय नमः । श्रीसद्गुरुः शरणम् ॥

# पूज्यपाद अनन्तउपकारी पिताश्री तथा गुरुदेव मुनिराजश्री १००८ भुवनविजयजी महाराज !

बहुपुण्याश्रितं दत्त्वा दुर्लभं नरजन्म मे ।
लालनां पालनां पुष्टिं कृत्वा वात्सल्यतस्तथा ॥१॥

वितीर्य धर्मसंस्कारानुत्तमांश्च गृहस्थितौ ।
भवद्भिः सुपितृत्वेन सुबहूपकृतोऽस्म्यहम् ॥२॥

ततो भवद्भिर्दीक्षित्वा भगवत्त्यागवर्त्मनि ।
अहमप्युद्धृतो मार्गं तमेवारोह्य पावनम् ॥३॥

ततः शास्त्रोक्तपद्धत्या नानादेशविहारतः ।
अचीकरन् भवन्तो मां तीर्थयात्राः शुभावहाः ॥४॥

अनेकशास्त्राध्ययनं भवद्भिः कारितोऽस्म्यहम् ।
ज्ञान-चारित्रसंस्कारैरुत्तमैर्वासितोऽस्मि च ॥५॥

ममात्मश्रेयसे नित्यं भवद्भिश्चिन्तनं कृतम् ।
व्यापृताश्च ममोन्नत्यै सदा स्वाखिलशक्तयः ॥६॥

ममाविनयदोषाश्च सदा क्षान्ता दयालुभिः ।
इत्थं भवदनन्तोपकारैरुपकृतोऽस्म्यहम् ॥७॥

मोक्षाध्वसत्पान्थ ! मुनीन्द्र ! हे गुरो !
वचोऽतिगाः वः खलु मय्युपक्रियाः ।
असम्भवप्रत्युपकारसाधनाः
स्मृत्वाहमद्यापि भवामि गद्गदः ॥८॥

– तत्रभवदन्तेवासी शिशुर्जम्बूविजयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org




Jain Education International For Private & Personal Use Only www.jainelibrary.org